गौणकालव्याप्तिर्वा पूर्वैव ग्राह्येत्याह। मुख्यास्पृष्टमह्नद्वयं गौणं यदा च दिनगा ग्राह्या। तादृशीति। मुख्यका
लाबाधे गौणकाले प्राप्तं भोजनं नाशं क्यतीति भाद्रपूर्णवे प्रावानं राघो निरुध्यतइति॥७॥ इति
श्रीकालनिर्णयदीपिकाविवरणे तत्कालनिर्णयः॥ अथोपवासतिथिनिर्णयः॥ तत्र व्रतविशेषेण
उपवासतिथिनि पर्युदासेन चतुर्थ्यादीनां परत्वमाह। हेरंबान्यचतुर्थ्यं रंभ हुतभुक् शुक्लद्वितीयाप्युपवास
स्तव्या शिवरात्रिवर्जितचतुर्दश्यपरुद्राष्टमीएकादश्यसितत्रयोदशीतिथिः स्कंदान्यषष्ठीपरा
सावित्रीतरपंचमीदशमीति। हेरंबो गणेशः। हुतभुक् कृत्तिका। पंचदशी पूर्णिमामावास्येति। तथा
च गार्ग्यः। एकादशी तथा षष्ठी अमावास्या च पूर्णिमा चतुर्थी का उपोष्या पररसंयुताः। पराः पूर्वे
णसंयुताइति। परा अनंतरा। विद्धधर्मोत्तरे। एकादश्यष्टमीषष्ठी द्वितीया च चतुर्दशी त्रयोदशी
अमावास्या उपोष्याः स्युः परान्विताः। तथा एकादश्यष्टमीषष्ठी पौर्णमासी चतुर्दशी अमावा
स्या तृतीया च ता उपोष्याः परान्विताः। अन्याश्च तिथयः सर्वा उपोष्याः पूर्वसंयुताः। अन्याश्चेति
भयः सर्वा इति वचनांतरविहितपरविद्धोपवासे ■ इति तिथिव्यतिरिक्ता इत्यर्थः। चतुर्थी चन्द्र
यास्यां महापुण्यफलप्रदा। कर्तव्या व्रतिभिर्वत्स गणनाथसुतोषणे। इति ब्रह्मवैवर्ते। कृष्णा
ष्टमी बृहत्तपा सावित्री वटपैतृकी। कामत्रयोदशी रंभा उपोष्याः पूर्वसंयुताः इति निगमात्। रु

दृव्रतेषु सर्वेषु कर्तव्या संमुखी तिथिरिति वचनात् । कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी । एताः पू
र्वयुताः कार्यास्तिथ्यंते पारणं भवेदिति पुराणाच्च गणेशरंभाशिवरात्रिस्कंदाख्या विजीरुद्रव्रतेषु पूर्ववि
द्धत्वं । द्वितीया पंचमी वेधाद्दशमी च त्रयोदशी । चतुर्थी चोपवासे च हन्युः पूर्वोत्तरे तिथी इति वृद्धवसिष्ठ
वचनात् । तृतीयैकादशी षष्ठी न पायेवाष्टमी तिथिः । वेधाद्धास्ता हन्युस्ता उपवासे ति । [illegible] इति ना
रदीयपुराणवचनाच्च । द्वितीयात्रयोदश्योः पूर्वविद्धत्वे प्राप्ते कृष्णपक्षे तिथिर्ज्ञेया यस्यामस्तमितो रवि
रिति वचनात् कृष्णद्वितीयायाः षष्ठ्यष्टमी चामावास्याः कृष्णपक्षे त्रयोदशी । एताः परयुताः पूज्या इति
निगमवचनात् कृष्णपक्षव्यतिरिक्तत्रयोदश्याः पूर्वविद्धत्वमित्याशयः । अथ तिथिविशेषाश्च पूर्वान्वि
॥७॥ ताः इति अन्याश्च तिथयः सर्वदोपोष्याः पूर्वसंयुता इत्युक्तवचनविशेषात् । चतुर्दशीयुक्तत्रयोदश्युप ॥७॥
वासनिषेधः काम्यत्रयोदशीव्यतिरिक्तविषयः कृष्णाष्टमी स्कंदचापेति वचनादिति केचिदाहुः । कामामा
तुपरेति केचिद्वदन्ति सर्वा त्रयोदशी तु परदिन उदयोदारभ्य उदयांतरं व्याप्य तिथिर्वर्धते इति साच वचनात्त
रात्परा । तदा तिथिः सशल्या परिवर्जनीया धर्मार्थकामेषु बुधैर्मनुष्यैः विहीनशल्यापि विवर्जनीया
पदागतो वा द्विमुपैति पुष्ये इति विष्णुधर्मोत्तरार्धरात्र धापयामास मनुश्च पूर्वो भासोदये च तथोत्तरः ।
त्याज्यापि तिथिस्तापापूर्वोक्तदोषा गालासमागोत्तरे ति स्मृत्यंतराच्च परे च व्याप्ती कयपस्मिन्काले तु पल्ल्वि
तत्कालव्यापिनी तिथिरिति वचनाद्दोलात्रतिष्ठ्याच स्योपवासस्य पर्वद्युः सकलव्यापित्वात् रदिनारा
त्रौ व्रतं पक्षे एकभक्ते कनिषौगतं न स्यात् उभयोर्योगिन्यामावरे ज्ञातुं नक्ती ति वचनाच्च । तिथिः सत्रा
ल्पे व्यस्य चैकादश्यादिविषयत्वात् यथामालिम्नु च पूर्वद्रव्यस्य रक्तवदपोऽपरावि व्याकेन समानी विषयत्वाच्च पू
पो। र्वेत्याह अथोनानाप्योत्तरयुक्तात्यजेदपि चतुर्दश्यां पर्वत्र पूर्णास्तिवोदिता । पदोपवासनीय तिथिः पूर्वेद्युर्नि

द्विभागं वा स्युर्न्नं वाद्रुपये त्रितिथिः । पंचगव्यप्राशं
घतिथिविद्धा अपरे कुर्च्छ्रतिकामा । जातदाच तिकार्थे स्नानोपवासनियमेन तिकैकापदा भवेत् । सानिथि
पूर्णं सुरयापि द्विकोपथ्ये त्रिषट् त्रिंशन्मतात् । तथाद्य नोपवास नियमेन तिकैकापदा ... परे वैन्याह । आह्वाचोदपकीर्त्यौ परि निमाएला
सकलाङ्गे यापि च पर्थे यापराह्निकी नित्य विष्णुपुराणाद्यं परे वैन्याह । ... अपरे तु रुदयेनास्ति तदा अविद्धापि निषिद्धे श्रेष्ठ
न्विता निंद्यमा तिथ्या ह्रह निचेदितिः । यदापूर्वे तु विद्धा अपरे तु रुदयेनास्ति तदा अविद्धान्यन्यानि दिनान्युपवसेन्नरद्
लभ्यंते दिना नितु मुहूर्त्तैः पंचभिर्विद्धा ग्राह्या लैकादशी विधिः । तदर्थं विद्धान्यन्यानि दिनान्युपवसेन्नरद्
तिश्रेष्ठ शृंगवचनान्निषिद्धे द्विनेपंचदशतिविद्धापि ग्राह्ये त्याह अथोत्तर दिने नौचेत्तस्त्रास्तादि मनाडी
पंचकवेधयत्नपीति । पंचवस्त्राधिकवेधे निर्णयमाह । ततो वेधाधिकत्ये फलं क्षीरं दध्यापि वोपभुञ्ज्य
तानुपात्तत्रोपवासं व्रतीति अविधानाम भावेनुपयोदधि फलानि वा । सद्धदेवाप्यम स्त्रीयाद्रुपवासस्त
तो भवेदिति वचनात् । भतानां तरमुपन्यस्यन्ति । वायुप्रोक्तं वारप्राक्रपोपवासस्तथाहि । न कं हविष्यान्न
मनोदनं वा फलं तिलाक्षीरमथांबु वाज्यं । यत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं च तिं । ७५
मनोदनं वा फलं तिवाक्षीरमथांबु वाज्यं । यत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं च तिं
इति कालनिर्णयदीपिकाविवरणे उपवासनिर्णयः ॥ ७ ॥ अथ नक्षत्रोपवासनिर्णयः ॥ यदा दिनद्वये

नक्षत्रोपवा

इति कालनिर्णयदीपिकाविवरणेऽपवासनिर्णयः ॥ ७ ॥ अथ नक्षत्रोपवासनिर्णयः ॥ यदा दिनद्वये
ऽस्तमयसंबंधि नक्षत्रं यदा वा दिनद्वयेऽपि न तदा पूर्वदिन एवास्तमयस्पर्शसंबंधि यावत्तदा परदिन एवास्तमयसंबं
धिनक्षत्रोत्तरामित्याह । स्यादूर्ध्वं पूर्वमहर्द्वये स्तमययुङ्गो । ... तथाहर्द्वये व्याप्यहोद्वेत्त थान्यथा तु परतोऽन्या
ध्यंतदेवेष्टुजिरिति । भं नक्षत्रं आद्यहन्येव तथा पूर्वे स्मिन्नेव दिने स्तमयस्य संबंधिनो चरस्मिन्निति त्यर्थः ।
नभायकालनिर्णयकारैरुक्तं उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः । यत्र वायुर्जपते राम निशी
थः । रात्रौ ज्ञानासहेति विष्णुधर्मवचनं । यत्रार्धरात्रादर्वाक् तु नक्षत्रं प्राप्यते तिथौ । तन्नक्षत्रव्रतं कु
र्यादिनीते पारणं भवेदिति सुमंतुवचनं च पठित्वा पूर्वपक्षं च निरस्य तस्मादेवं व्यवस्था यदा पूर्वेऽस्मि
न्नेव दिने स्तमयसंबंधितदा पूर्वं यदा दिनद्वये विनास्तमयसंबंधि वदापि तथैव । यदापूर्वे चतुरर्ध

जन्माष्टमी

रात्रसंबंधिद्वितीयदिनेवास्तमुपसंबंधिनदाद्वितीयमिति॥८॥इतिनक्तोपवासनिर्णयः॥अथज
न्माष्टमीनिर्णयः॥रोहिण्यामर्धरात्रेचयदाकृष्णाष्टमीभवेत्।तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिज
न्मजंइत्यादिवाक्येरोहिण्यष्टम्यर्धरात्रयोगस्यप्राशस्त्येसतियदादिनद्वयेप्यर्धरात्रेरोहिण्यष्टमी॥
योगोस्तिनविद्यतेवातदावर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमी।सऋक्षापिनकर्तव्यासप्तमीसंयु
ताष्टमीतिब्रह्मवैवर्तवचनात्।परैवेत्याह।रोहिण्यासहितानिशीथमुभयंयापान्नवासंस्पृष्टरोस्वाष्ट
म्युत्तरगस्मृतोपवसनेइति।यायाअंछेत्।यदायदिनेर्द्धरात्राद्ध्रुवमष्टमीप्रवृत्ताद्वितीयेह्निव्यतिका
मात्रावारोहिणिस्यात्।तदोत्तरेत्याह।अर्धोर्ध्वनिशीथाद्भवेत्।अष्टम्याचनिशीथपरत्रदिवसेनाडि
मुहूर्तादिवाजंस्यास्तापिपरेद्युतइति।नाडीमितचकालाधिनोरितिद्विनीया।तथाचस्कांदे।सप्तमीसं
युताष्टम्यांभूत्वारुर्चांद्विजोत्तमः।प्राजापत्यंद्वितीयेह्निमुहूर्तार्धंभवेद्यदितदाष्टम्यानिकर्षोयंप्रोक्तंय ॥१२८॥
स्तादिभिःपुरेति।पाद्मेपि।मुहूर्तेनापिसंयुक्तासंपूर्णासाष्टमीभवेत्।किंपुनर्नवमीयुक्ताकुलको ॥१२८॥
ट्यास्तुमुक्तिदाइति।अथअयुताप्येवस्मृतासाव्रतेइति।पद्मअंत्याद्वितीयाएवअयुतानस्तेत्रयुक्तानपू
र्वविद्धासाह्यावनेस्मृता।तथाचविष्णुरहस्ये।प्राजापत्यर्क्षसंयुक्ताकृष्णानभसिनाष्टमी।मुहूर्तमपिदिल
भ्येतसोपोष्यासामहाफलेति॥ ॥तस्याएववारयोगेप्राशस्त्यमाह।सावित्र्याद्बुधसोमयुग्यदित
दातीवप्रशस्येति।तथाचपद्मपुराणे।प्रेतयोनिगतानांतुप्रेतत्वंनाशितंनरैः।यैःकृताश्रावणेमासि
अष्टमीरोहिणीयुता।किंपुनर्बुधवारेणसोमेनापिविशेषतः।किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदा।
अथयथापूर्वेद्युःसर्वंयुतानिशीथयुताभास्त्वत्कृष्णाहवाजवैरात
द्वैतेउत्तरविद्धमुक्ताःपूर्वविद्धामाह।प्राजापत्यर्क्षसंयुक्तादिनाकोयदा
पूर्वांसमुपावसेदिति।यापूर्वेद्युरोहिणीयुतातांपूर्वामुपावसेत्।रोहिण्यामर्धरात्रेचेत्या
स्यामहाफलत्वात्।यावत्पूर्वदिनेएवार्धरात्रेनक्षत्रयुक्तानामपिपूर्वामुपावसेत्।रोहिण्यामर्धरात्रेचेत्या

पारणानिर्णयः ॥

दिवायेपेस्तस्याः पापहरत्वाभिधानात् । याव दिनक्षये सैकिणी रक्षितानामपि पूर्वामुपावसेत् । हस्तक्ष्मेपक्षे एका
वेवद्धक्ष्मपक्षे चतुर्दशी । पूर्वविद्धैव कर्तव्या परविद्धा न कस्यचिदित्यादिवाक्यबलादित्यर्थः । नक्षत्रादेः स्थू
लानयनं सूक्ष्मानयनं ज्योतिःशास्त्रे प्रसिद्धं तत्र स्थूलानयनं व्यवहारप्रसिद्धमिति तदेवाश्रयणीयमित्या
ह । इहपथस्थूलेन भागाश्रयेदिति इह अस्मिन्शास्त्रे स्थूलेनयथाभागेण आदिनक्षत्रादि आश्रयेदित्य
न्वयः । तथा च ज्योतिःशास्त्रं । स्थूलं कृतं मानयनं यदेतज्ज्योतिर्विदां तद्व्यवहारसिध्यै । सूक्ष्मं प्रवक्ष्ये थनु
निप्रजितविवाहयात्रादिफलप्रसिध्यै इति ॥ पारणानिर्णयमाह । शक्त्येति । पिआवसानसमयेकुर्वीत
तत्पारणं । अंतेऽपस्यातिथ्यर्क्षयोरुत भवेदप्यर्धरात्रे भुक्तिः । शास्त्रास्यादिति । यदा भस्यनक्षत्रस्य तिथे
रष्टम्याः उभयथ वाद्ययोस्तिथिनक्षत्रयोः रंतः समाप्तिः अर्धरात्रे भवेत्तदामध्यरात्रेपि भुक्तिः शास्त्रास्या
त् । तथा योक्तं ॥ तिथ्यर्क्षयोर्यदाछेदो नक्षत्रांतमथापि वा । अर्धरात्रेथ वा कुर्यात्पारणं त्वपरेहनीति । असम
मर्थ एकविगमे तिथ्यृक्षयोः पारयेदिति असमर्थः द्वयोरंते पारणं कर्तुं अशक्तस्तिथ्यृक्षयोर्मध्ये एकवि
गमे एकस्य समाप्तौ पारयेत् पारणं कुर्यादिति । तिथिरष्टगुणा हंति नक्षत्रं च चतुर्गुणं तस्मात्प्रयत्नतः कु
र्यात्तिथिभांते च पारणमिति ब्रह्मवैवर्तवचनं शक्तविषयं । भांते कुर्यात्तिथेर्वापि शस्तं भारतपारणमि
ति वह्निपुराणं च शक्तविषयमिति भावः । प्राजापत्यर्क्षसंयुक्ता श्रावणस्यासिताष्टमी । वर्षे वर्षे तु क
र्तव्या तुष्ट्यर्थं चक्रधारिण इति । विष्णुधर्मात्तुष्ट्यर्थं देवकीसुनोर्जयंतीसंभवं व्रतं कर्तव्यं वित्त
मानेन भक्त्या भक्तजनैरपि । अकुर्वन्याति नरकं यावदिंद्राश्चतुर्दशेति अकरणे दोषश्रवणाच्चरकादशी
वत् जयंती । व्रतस्य नित्यत्वमाह । चीभाजो अकरणे च दोषकथनादेकादशीव । ज्वणां कामफलेपि नि
बंधकैः निगदितं नित्यं जयंतीव्रतमिति निबंधकृद्भिः निबंधकारैः ॥ ७ ॥ इति श्रीकालनिर्णयदीपि

एकादशी

कावि वरणे जन्माष्टमी निर्णयः ॥४॥ अथ एकादशी निर्णयः ॥ तत्र सागरो मातेव सर्वबालानां मे पथ्यं रो
गिणामपी रक्षार्थं सर्वलोकानां निर्मितैकादशी तिथिः ॥ तथा एकादश्युपवासी यः किं तस्यान्येन वासवाने का
दश्युपवासी यः किं तस्यान्येन वा फलं ॥ तथा अश्वमेधसहस्राणि वाजपेयशतानि च एकादश्युपवास
स्य कलां नार्हन्ति षोडशीमित्यादि सर्वपुराणेषु सर्वजनप्रसिद्धमेकादशी माहात्म्यमतः सर्वेषामेका
दश्यां भोजननिषेधमाह ॥ भुंजीरन्न हरेर्दिने खिलजनाः पक्षद्वयेपीति ॥ अखिलजनाः सर्वमनुष्या
हरेर्दिने एकादश्यां पक्षद्वयेपि शुक्लपक्षकृष्णपक्षे च न भुंजीरन् अन्नव्यवहारं न कुर्युरित्यर्थः ॥ अत्र देवल
नारदेनापि पितृचोदितं यः स्वादेत्सूक्ष्ममसूकरैः ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि ॥ ब्रह्मचर्येपि सर्वेषु
लं मधं भुंक्ते यो भुंक्ते हरिवासरे ॥ दिने तत्र सर्वपापानि एवं ... तानि तु तानि मोहेन ये श्रातिन्न स
दा पे विमुच्यते ॥ अग्निपुराणेपि गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च एकादश्यां न भुंजीत पक्षयो

॥१८॥

रुभयोरपीत्यादि ॥ एवं सर्वेषां पक्षद्वयेपि भोजननिषेधमुक्त्वा एकादश्यां न भुंजीत पक्षयोरुभयोर

॥१८॥

पीति ॥ वनस्थयतिधर्मोयं शुक्लामेव सदा गृही इत्यादि निर्देवलादिवाक्यैः गृहस्थव्यतिरिक्तैः पक्षद्वयेपि
एतद्व्रतमनुष्ठेयमित्याह ॥ व्रते त्वेकादश्युभयोर्गृही त्वन्यः कार्येति शुक्लामेव सदा गृहीत्यादिना गृह
स्थस्य शुक्लैव प्रशस्तेत्याह ॥ अथ शुक्लैव सा तत्र स्मार्त्तस्याग्रहणादिति ॥ स एकादशी ॥ आषाढी कार्त्तिकी
मध्यवर्त्तिनी कृष्णापि गृहस्थेन कार्येत्याह ॥ असितापि शयनीबोधनीयोरंतरस्थापीति ॥ तथा च पुराणं
शयने बोधनी मध्ये या कृष्णैकादशी भवेत् ॥ सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचनेति ॥ शयनी
बोधवाक्येन गृहस्थमात्रस्य कृष्णैकादश्युपवासप्राप्तौ सत्यां ॥ संक्रांत्यामुपवासं च कृष्णैकादशिवास
रे ॥ चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृहीत्यादिवाक्यानां यानि षेधकता सा पुत्रवतो गृहस्थस्यैव
शयनीबोधमध्यवर्त्तिकृष्णैकादश्युपवासनिषेधपरा प्राप्तावेव प्रतिषेधः सोपि वचनादित्याप्रे
त्याह ॥ अपरेस्तु ...

38

न्मज्जिनो पीति। आत्मजिनः पुत्रवत्। पुत्रवांश्च सभार्यश्च वा धुधुक्तस्तथैव च उभयोः पक्षयोः काम्यं व्र
तं कुर्याच्च वैष्णवमिति स्मरणम् अत्रेत्याह। पुत्री गृही गां काम्यव्रते स्यात् कृपीति। कपी शुक्लकृष्णैकादशी
ति ह द्वाम्येकादशी यत्र तत्र नोपवसेद्बुधः। अपत्यानि विनश्यन्ति स्वर्गलोकं न गच्छतीति वासिष्ठसंहिता
दिवाकौ। सामान्येन दशमीवेधनिषेधे प्राप्ते सूर्योदय स्पृशाद्ये पादशम्यागर्हिता सदेति स्मृतेः सू
र्योदये दशमीयुक्तैकादशी विद्धा इतरा शुद्धेत्याह विद्धाच्छुद्धे दशम्यानुगता शुद्धान्यथेति। पद्मपुरा
णे। शुद्धा विद्धा पुनस्त्रेधा भेदैर्न्यूनसमाधिकैः। तत्रैकादशी स्त्रेधा द्वादश्या न्यूनसमाधिकैः। अस्यार्थः ति
शुद्धाविद्धा इति द्विधा एकादशी। सा पुनरष्टादशधा। विद्धा तो शुद्धा न्यूना न्यूनद्वादशिका। १ शुद्धा न्यूना स
मद्वादशिका। २ शुद्धा न्यूना अधिकद्वादशिका। ३ शुद्धा समा न्यूनद्वादशिका। ४ शुद्धा समा समद्वादशिका। ५
शुद्धाधिका अधिकद्वादशिका। ८। एवं विधापि नवविधेति। तत्पाय संग्रहश्लोकः। ह्रष्ठ चाष्ट्या ॥ शु
द्धा विद्धा द्वयर्न दाखेधा न्यूनसमाधिकैः। षट् प्रकारा पुनस्त्रेधा द्वादश्या न्यूनसमाधिकैः। तत्र शुद्धाधिका
न्यूनद्वादशिका। शुद्धाधिका समद्वादशिका यो स्य निर्णयमाह। अथो यदा द्वादश्यास्ति समाधिकोत परतः
शुद्धाधिकैकादशी काम्याद्यां समुपावसेत्परदिने वांछाविहीनस्तदा विष्णुप्रीणदक्षयोरुपवसे
दिति। यदा शुद्धएकादशी परतः परस्मिन् दिने अधिकास्ति द्वादशी च समा ऊर्ध्वा मात्रपयो। भाउन अथ
या स्यिका सूर्योदयात् न्यूना भवति तदा काम्यी सकामः। आद्यां शुद्धामेकादशीमुपवसेत्। वांछाविहीनो नि
याधिका सूर्योदयात् न्यूनाभवत्तदा द्वादश्यामुपवसेत्। विष्णुप्रीणनदक्षयोर्दिनयोरुपवसेदित्यन्वयः। तथा
कामः परदिने एकादशी पुनर्द्वादश्यामुपवसेत्। विष्णुप्रीणनदक्षयोर्दिनयोरुपवसेदित्यन्वयः। तथा
कामः परदिने एकादशी पुनर्द्वादश्यामुपवसेत्। संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही। पुनः प्रभा
च गरुडपुराणे। उदयात्प्राक् यदा विप्र मुहूर्तद्वयसंयुता। संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही। पुनः प्रभा
तसमये घटिकैका परा भवेत्। तत्रोपवासो विहितश्चतुर्थाश्रमवासिनां। विधवायाश्च तत्रैव परतो द्वा
दशीन चेत्। अत्र च शब्देन वानप्रस्थादि ग्रहणं। गृहि पति शब्दो सकाम निःकामावेव भिप्रेत्यो तो। तथा

च मार्कंडेयः। संपूर्णैकादशी यत्र परत्र पुनरेव सा पूर्वामुपवसेत्कामी निःकामस्तूत्तरां वसेदावसेदुपवसेदि
त्यर्थः। गृही शब्दस्य गृहस्थमात्रवचनत्वे निःकामस्य गृहस्थस्य द्वितीयैकादश्युपवासविधायकवचन
विरोधः स्यात्। तथा च स्कांदे विधानं। निःकामस्तु गृही कुर्यादुत्तरैकादशीं सदा। प्रातर्भवेत्तु या मात्रा द्वादशी
च द्विजोत्तमा इति एतद्वाशिष्टेभ्योऽन्यैराचार्यवर्यैः। काम्याद्यामित्यादिना। विष्णुप्रीतिकामस्योपवासे सद्वचस्कवसि
दृष्टेनोक्तं। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत् उपोष्ये द्वे तिथी तत्र वि
ष्णुप्रीणनतत्परैरिति॥ विद्धन्यूनासमद्वादशीकाया विषयमाह। नंदायु विद्धा त्यिका। द्वादश्यपि समा तदा स्मृ
तावतां नुत्तमपूर्णिमा स्यात्परेति। नंदा एकादशी। अरुणोदयवतां पुत्रवद्गृहस्थानां। तथा च व्यासः। एकादशी तु नष्टा
दशी भवेत् उपोष्या द्वादशी विद्धा अपि रुद्रालकाञ्चवादिन्यादिवचनैः सर्वेषां पूर्वविद्धोपवासे प्राप्ते। दिनक्ष
याणे। दिनक्षयेतु संप्राप्ते द्वादशीं समुपोषयेत्। पारयीन त्रयोदश्यां परीक्षेत् श्रेयआप्नुयादिति निषेधात्। तथा ब्रह्म
गृहिणां परा। तथा। दिनक्षयेतु शुद्धैव द्वादशी मोक्षकांक्षिभिः उपोष्या द्वादशी विद्धा नोपोष्यैकादशी तदेतिस्मु
मंतु सत्यव्रतवचनात् मुमुक्षूणां परेत्यर्थः॥ ३॥ विद्धन्यूनान्यूनद्वादशिका विषयमाह। विद्धानरक्तभनोल्प
काहरति पितृश्चैव कार्यां रिक्तेरेति। भवः एकादशी हरति पितृद्वादशी। अखिलैः सर्वैः। तथा निगमो पूर्वविद्धा
नकर्तव्या षष्ठ्येकादश्यथाष्टमी। एकादशी न दा कुर्यात् क्षीयते द्वादशी यदीति वचनात् सैवोपवसनीयेत्यर्थः ४
विद्धसमा समद्वादशिकाया विद्धसमान्यूनद्वादशिकायाश्च विषयमाह। नंदा विद्धसमा पद्महरति पिः न्यूना सम
वाचरेत् मुमुक्षुः परतो व्रतमिति। परतो व्रतं परस्मिन् दिने उपवासं चरेदित्यर्थः। तथा च। विद्धाप्येकादशी गा
त्वापरतो द्वादशी न चेत्। द्वादशी द्वादशीं हंति त्रयोदश्यां तु पारणं। आदिवचनैः सर्वेषां विद्धोपवासे प्राप्ते विष्णु
रहस्ये दशमी मिश्रिता पूर्वा पूर्णैव द्वादशी परा। एकादश्यां महाप्राज्ञ उपवासः कथं भवेदित्युपक्रम्योक्तं।

॥२०॥

शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिः। तथा च दशमीमिश्रिता पूर्वा द्वादशी परिलुप्यते। एकादश्यां ना
हा प्राज्ञ उपवासः कथं भवेत्। शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिः। पारणं तु त्रयोदश्यां तदा पि त्याज्यता ना
दैनमित्यादिव्यासादिवचनैः मुमुक्षुः परदिने उपवासं कुर्यादित्यर्थः। विद्धाधिका समद्वादशिकायां निर्णयमा
ह। यदि भवो विद्धाधिको न समः॥४॥ सर्वेषां परतः इति अजा द्वादशी। तथा च तत्त्वसागरे। द्वादश्येकादशी यत्र संगता
त्रिंशाधिपस्तामुपोष्य ततः कुर्यात् त्रयोदश्यां तु पारणमित्यादिवचनैर्विधानात्। तथा नारदीये। पूर्वविद्धा न कार्ये
धर्मकामार्थमोक्षाजिरित्यादिनिषेधात्। सर्वेषां परदिने उपवा
व्याप्ता यावत् षष्ठ्यपि द्विज। अष्टम्येकादशी भूता धर्मकामार्थमोक्षहा। अथ खर्वहरियुक्तविद्धाधिकशुद्धे द्वे मोक्षार्थिनः आह। अपवि
सम्यगर्थः। विद्धाधिकान्यूनद्वादशिकायां विषयमाह। अथ खर्वहरियुक्तविद्धाधिकशुद्धे नोपवसेन्मोक्षार्थी विष्णुर्जनार्दन इति। खर्वहरियुक्तन्यूनाधि
क्यकास्तूपवसेदित्याग्रहीत्वा चरेत्। न कं च वत्रनदादिनां मुपवसेन्मोक्षार्थी विष्णुर्जनार्दन इति। तथा च एकादशी द्वादशी च रात्रिशेषे त्रयो
दशीयुक्ता। विष्णुकामी विष्णुसायुज्यकामी अन्त्या परा च सदितार्थः। तस्यां महापातकनाशनः। द्वादश्यामुपवासाभू
दशी त्रिभिर्मिश्रितिथिः प्रोक्ता सर्वपापहरा स्मृता। उपवासः कृतः तस्यां महापातकनाशनः। एकादशी द्वादशी चरात्रिशेषे तत्र त्रयोदशी
पदिनस्य तिथिर्भवेत् तदोपवासः कृत्स्नो विष्णुसायुज्यमनुयात्। एकादशी द्वादशी
उपवासः कृतः तत्रमो समेव प्रपद्यते तिथयनादेन कामितां परे इति भावः। तथा च कूर्मपुराणे। एकादशी द्वादशी
च रात्रिशेषे त्रयोदशी उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः। इत्यादि निषेधात्। न था दशम्येकादशी विद्धाग
दशीयस्य पंगता। ज्ञानां च द्वादशीं ग्रपानं नंतत्र विधीयते इति वृद्धशातातपेन ग्रहीतव्य
तामेव आचरेदिति भावः। विद्धाप्य विद्धा विद्धे यापरतो द्वादशीन चेदित्यादिसामान्यवचनबलेन मोक्षार्थ
विदुः। तदा दिमां विद्धैकादशीमुपवसेदित्याशयः। शुद्धन्यूनान्यूनद्वादशीकायां शुद्धन्यूनासम द्वादशि
कायां। शुद्धसमासमद्वादशिकायां। शुद्धसमान्यूनद्वादशिकायां। अविप्रतिपत्तेः। एभ्यो वामिवेशु
कायां। शुद्धसमासमद्वादशिकायां। शुद्धसमान्यूनद्वादशिकायां। शुद्धे न्यून्यपायोरिति। एकादश्यां
हैकादश्यामेवोपवासः कार्य इत्याह। अन्यासां विमतिर्हिवान अधिके शुद्धे न तु न्यूनयोरिति। एकादश्यां सह्या
इति शेषः। एकादश्याः शुद्धन्यूनत्वे शुद्धतुल्यत्वयोः सत्त्वात्सर्वसाधकेन द्वादश्यां न्यूनायां समायां वा सह्या

॥२७॥

एकादश्युपवासे विभक्तिर्विप्रतिपत्तिर्नोऽस्तीत्यर्थः ॥७॥ शुद्धन्यूनाधिकद्वादशिकायाः ३ ... द्वा
धिकाधिकद्वादशिकायाः ४ शुद्धसमाधिकद्वादशिकायाः ५ विद्धन्यूनाधिकद्वादशिकाया ... विद्धाधि
काधिकद्वादशिकायाः विद्धसमाधिकद्वादशिकायाश्च निर्णयमाह । शुद्धानाम्यधिका समा भवतु वा
विद्धा तथैकादशी चेद्द्वादश्यधिका तत्रोपवसनेऽप्यास्था खिलैर्द्वादशीति । शुद्धा एकादश्यूना अभ्यधि
का समा वा भवतु विद्धैकादशीत्व ऊनाऽधिका समा वा भवतीत्यर्थः ॥ तथा च स्मृतिः । संपूर्णैका
दशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या द्वितीया स्यात्परतो द्वादशी यदि । सर्वेषि ते दोषः । एकादे पूर्णा
प्येकादशी त्याज्या वर्धते द्वादशी यदि । द्वादश्यां पारणाभावे पूर्वैव परिगृह्यते । पूर्णाप्येकादशी त्याज्ये
ति सर्वविषयं द्वादश्यां पारणाभावे इति गृहिविषयमिति । कालनिर्णयकारैर्व्याख्यातं तथा च ना
रदः । संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि । पद्मपुराणे अवि
द्धापि तथा विद्धा परतो द्वादशी यदि । द्विकालयां तु द्वादश्यां पारणं यः करोति हि । तामुपोष्य महीपाल
नगर्भे विशते नरः इति । लैंगे तथा । त्रयोदश्यां महाराज द्वादश्यां स्वल्पकाऽभवेत् । सा तिथिः सकल
वेति वशिष्ठः प्राह धर्मवित् इत्यादिवचनान्यथ प्राबल्येन सर्वैर्द्वादश्येवोपवासेनेत्यास्थेति भावः ।
दशमीवेधसंयुक्तो यदि स्यादरुणोदयः । वैष्णवैर्न तु कर्तव्यं तद्दिने एकादशीव्रतमिति । विष्णु
पुराणात् अरुणोदयवेधं परित्यज्य द्वादश्यामेव वैष्णवैरेकादशीव्रतं कार्यं तथा अरुणो
दयवेलायां दशमी यदि संगता । रविचक्रार्धमात्रापि द्वादश्यां समुपावसेत् । तत्र क्रतुशतं पु
ण्यं त्रयोदश्यां तु पारणमित्यादिवचननिचयप्राबल्येन वैष्णवव्यतिरिक्तैः काम्यैकादशीव्रतेऽप्यरु
णोदयवेधं वर्जयेच्छैवाद्वादश्यां तु ... स्तथैतरजनाः काम्यप्र
हि ... वासा येऽचारुणोदयेऽपि दशमीवेधं ...

॥२७॥

41

तं चेति। अरुणोदयश्चतस्रो घटिकाः प्रानरुणोदयउच्यते इत्यादिवचनात् ज्ञेयः। अर्धरात्रेपि के
षांचित् दशमीवेधइष्यते इत्यभिप्रेत्याह। अथ चेत् दिग्वेधोस्ति निशीथमुक्तव्रतविधावापि
स्वतर्पोभवेदिति। दिक् दशमी आद्ये आद्यदिवसे उपसंहरति। संक्षिप्योक्तं मेदं व्रतेत्रनि
यमाद्यन्यत्र पश्येद्बुध इति। बुधो विद्वान् अत्र एकादश्यां व्रते। नियमादि नियमसंकल्पो
द्यापनानि अत्र व्रते खंडादौ पश्येद्बुधः। कुतः। यतः अस्माभिः एकादशीप्रकरणं संक्षिप्यो
क्तं। संगृह्योक्तं। संग्रहाधिकारिणाम् अस्माकं विस्तारकथनम् नावश्यकमिति भावः। तथा
च ब्रह्मवैवर्ते उन्मीलिनी वंजुली च त्रिस्पृशा पक्षवर्धनी। जया च विजया चैव जयंती पाप
नाशिनी। द्वादश्यष्टौ महापुण्याः सर्वपापहराः स्मृताः। तिथियोगेन जायंते चतस्रश्चापरास्त
ताः। नक्षत्रयोगात् प्राबल्यात् पापं प्रशमयंति ताः। एकादशी तु संपूर्णा वर्धते पुनरेव सा। उन्मीलि
नी स्मृताः श्रेष्ठा कथिता पापनाशिनी। द्वादश्यामुपवासस्तु द्वादश्यामेव पारणं। वंजुली नाम सा
प्रोक्ता हत्यायुतविनाशिनी। अरुणोदय आद्यास्यात् द्वादशी सकला दिनं। अंते त्रयोदशी
प्रातः त्रिस्पृशा सा हरेः प्रिया। कुहूराके यदा वृद्धिं प्रयाते पक्षवर्धनी। विहायैकादशीं तत्र द्वा
दशीं समुपोषयेत्। पुष्यश्रवणपुनर्वसुरोहिणी संयुता स्तु ताः। सुपोषिताः स्युः फलदा द्वादश्य
ष्टौ पृथक् पृथक्। इत्यभिप्रायेणाह। याः स्यादिति। उन्मीलिन्यादि इति विधिः शोषाभवेत् त्रि
स्पृशा संपूर्णाधिकमासि पर्वपुरतश्चेत् पक्षवर्धनी ता। ५। उन्मीलिन्यापि शुद्धपूर्व शुभ
वपुः भद्रा तु शुद्धाधिका वंजुल्यप्यपुष्यविष्णुप्र पुनर्वस्वान्म ऋक्षान्विता। द्वादश्येव भवे

जया विजया तद्वज्जयंत्यां हस्तानाशिन्येव मन्निष्टकासु पवसेदष्टौ महाद्वादश्यः ॥५१॥ याहरितिथिर्द्वा-
दशी रूक्ष एकादशी जपात्रयोदशी। तद्युक्ता सानाज्ञात्रिस्पृशा भवेत्। नाम्नापक्षवर्द्धिनीति त्रिस्पृशास्च
पि संबंध्यते। संपूर्णाधिके पर्वपूर्णिमादर्शे पुरतः प्रतिपदि अस्ति भवति चेत् याहरितिथिपक्षव-
र्द्धिनी। शुक्लो वृद्धो भवः एकादशी तद्युक्ता हरितिथिरुन्मीलिनी। शुद्धाधिका भद्राद्वादशी वंजुली।
पुष्ययुक्ता द्वादश्येव जया। विष्णुभं श्रवणः तद्युक्ता विजया। पुनर्वसुयुक्ता जयंती। अलभ्रूने सोहि-
णि तद्युक्तांहमानाशिनी पापनाशिनी। एवं दृष्ट लक्षणनामान अष्टौ महाद्वादश्यः। अनेष्टका-
॥२२॥ मीन तद्युक्तामाखिलाषीउपवसेदित्यर्थः। एवं विस्तरेण निरूप्योपसंहरन्नेतन्निबंधकारः। एवं
समस्तसुखधर्मगुणश्रियां च एकादशीषु। यशाग्रजुजीतदोषासिविधिं निर्वर्त्य भस्पा भुंजी- ॥५२॥
नं एकादशी। अनंगे त्रयोदश्यां। भविष्यत्पुराणे। पूर्णा विद्धां परा धैनंनंदां पूर्णामपि त्यजेत् ॥२२॥
यावेष्ठेदात्म संतानं चतुर्दश निदमेस्रुपि। नोपोषितं नतं न च मेकभक्तमयाचितं। नंदापूर्णा
विद्धायां कुर्यादैश्वर्यमोहितः। एकादशीयुतां शस्ताद्वादशी समुपोषणे। नक्तेवायाचिते नित्य-
मेकभक्ते तथार्चने इत्याद्युक्तिमभिप्रेत्याह। नक्तायाचितमेकभक्तं भुजिस्त्रस्तोपमुक्तौ व्रतं तत्कु-
र्याद्युपवासयोग्यदिवसे नास्त्यन्यकालस्यतदिति यत्र अशक्तिः स्त्रोतापि उपवासस्थानीयनक्ता-
याचितमेकभक्तं व्रतमुक्तं व्रतत्वेनोक्तं तदुपवासयोग्ये दिवसे कुर्यात्। अन्यकालः पूर्वोक्तनक्ता-
दिकालः अस्पनक्तादेर्मुनिभिरनेस्मृत इत्यर्थः ॥८॥ इति श्रीसिंहाचार्यविरचिते कालनिर्णयदी-
वि पिकाविवरणे एकादशीनिर्णयः ॥८॥ अथ श्रवणद्वादशीनिर्णयः ॥८॥ पुण्याल्पश्रवणाद्वि-
दशी ॥

लं फलं द्वादशीतिः। तथा चायं छद्मधर्मो नरो रामं प्रति शंकरः। या राम श्रवणोपेता द्वादशी म
हती तु सा। तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनं। प्राप्नोत्यप्रयत्नाद्धर्मज्ञः द्वादशद्वादशीफ
लमिति। अयं च स्वल्पोपि योगः फलदः। तथा च श्रवणद्वादशी प्रकृत्य नारदीये। तिथिनक्षत्रयो
र्योगे योगश्चैव नराधिप। द्विकाले यदि लभ्येत स ज्ञेयो ह्यस्तयामिकः इत्युक्त्यादित्यभा
वः। मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता। महती द्वादशी ज्ञेया उपवासे महाफलेति स्कंदपु
राणवचनमपि प्रत्याह। अत्र श्रवणद्वादशीव्रतमिदं किल हेतुरुक्ताः श्रवणस्यान्चितो हरिरत स्तद्धरि
प्रियं यः। शुद्धाप्युतः प्रकुरुते लभते समुक्तिमिति। यदा पूकादश्युपवासः पृथक् विहितः द्वाद
श्युपवासः पृथक् तदा। एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्। न चात्र विधिलोपः स्यादुभयो
र्देवतं हरिरिति विधानात्। चातेन उपवासद्वयं कारणीयं पारणीतं व्रतं ज्ञेयमित्युक्तत्वात्।
अ समासे व्रतेन व्रतांतरमिति विधिलोपस्यात्स्वरूपेदेवताकत्वेन न भवतीत्यर्थः। अत्राकेन
तु एवमेकादशीं पश्चाद्द्वादशीं समुपोषयेत्। पूर्वं वासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति वि
धानात् द्वादश्युपवासमेव करणीयमित्यभिप्रायेणाह एकत्वे हरिनं द्योरुपवसेदेकत्र भो
देतु येः। शक्तौ स्यात् द्युपवासकृद्धरितिश्चाचेवान्यथोपावसेदिति। अन्यथा अशक्तः। यदैकस्मि
न्दिने एकादशी द्वादशी। अर्तंच प्राप्नोति तदे केनवोपवासेन व्रतद्वयसिद्धत्वात्यभिप्रेत्याह। यः।
त्रयोदश्यां तु शुद्धायां पारणे पृथिवीफलं। सर्वयज्ञाधिकं वापि नरः प्राप्नोत्यसंशय मिति ना
रदीयात्। तथा। अथ वा द्वादशी न स्यात् स्वल्पापि रविसंगता। पारितव्यं त्रयोदश्यां महाप
द्यपि वृद्धैरपि इति पद्मपुराणाच्च एकादशीव्रतिनः पारणदिने द्वादश्यभावेपि त्रयोदश्यां
पारणं भवति। यदा पारणदिने भोजनपर्याप्ता द्वादशी भवति। तदाप्यस्य

श्रवण
द्वादशी
॥२३॥

पुराणे कलाद्वयं त्र्यं वापि द्वादशी पारणे दिने । उषःकाले तु पंक्तिर्या लातन्मध्याह्निकीं तदा ॥ नारदीये
अल्पायामपि विप्रेंद्र द्वादश्यामरुणोदये । स्नानार्चनक्रियाः कार्या दानहोमादिसंयुताः ॥ कूर्मपुरा
णे कलाद्वयं चार्धं वापि द्वादशीमनतिक्रमे । अतिक्रान्ता द्वादशी तु हंति पुण्यं पुराकृतमिति । पद्म
पुराणे यदि किंचिच्चाल्पा द्वादशी वा द्वादशी योपलभ्यते । द्वादश्यां पारणं चात्र वर्जयित्वा त्रयोदशीमि
त्यादिवचनैः उषःकाले सर्वाणि नित्यकर्म समाप्य द्वादश्यां पारणं कार्यमित्यभिप्रायेणाह ॥ नदि
कथंचिन्नोपाने परदिने गौणचेद्द्वादशी पर्याप्ता ॥ ज्ञा विंश १५ पणे योजनीयं विवेकेन लिखितं ।
इति श्रीकालनिर्णयदीपिकाविवरणे एकादशीनिर्णयः ॥ अथ श्रवणद्वादशीनिर्णयः । पुण्यापल्प
श्रवणान्वितापि सकलाद्वादशीति ॥ तत्राह विष्णुधर्मोत्तरे ॥ राम प्रतिवां करः । यारात्र श्रवण
येता द्वादशी महती तु स्नात स्याद्युपोषितः । स्नातः पूजयित्वा जनार्दनं । प्राप्नोत्यपत्यं धर्मज्ञः द्वाद
शद्वादशी फलमिति । अत्र पंचरचल्यो वियोगः फलं । तत्राह श्रवणद्वादशीं ग्रहस्य नारदीये ॥ तं
भिन्नस्तत्र योगोऽयोगश्चैव नराधिप । द्विकालो यदि लभ्येत सङ्गमस्य स्नायामिकदमुका
स्यादिति भावः । मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता । महती द्वादशी ज्ञेया उपवासे महा
फलेति स्कंदपुराणवचनमभिप्रेत्याह । असौ चेत्सितेरास्त्वा भाद्रपदे महत्त्वमभिहितमिति । असौ श्र
वणद्वादशी भाद्रपदे शितेशुक्लपक्षे चेद्भवति तर्हि रास्त्वा अति प्रशस्ता स्यात् । महत्त्वमभिधाना
त्वाद्वादशी भाद्रपदे शिते शुक्लपक्षे चेद्द्वादशी भवेत् । अन्यत्र महती न स्यादितं भवति चा
स्यादित्यर्थः । बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत् । अत्यंतमहती सा स्यात् । विष्णुधर्मोत्तरे एकादशी द्वादशी
रूपमिति स्कंदमभिप्रेत्याह । सा चेद्बुधे तुल्यं नीता ॥ विष्णुधर्मोत्तरे एकादशी द्वादशी
चैवेकरूपमपि तच्च चेत् । न द्विष्णुशृंखलं नाम विष्णुसायुज्यकृद्भवेत् । राये छव्ये श्रवणा । एतद्
चनमभिप्रेत्याह । नंदा युग्पदि विष्णुशृंखलमिति विख्याता । इति द्वादशीति । स्कंदपुराणे । निमिन

॥२३॥

श्रवणनियमे तिथिभांते च पारणं। अतोऽन्यथा पारणायां व्रतभंगमवाप्नुयात्। नारदीये। ति
थिनक्षत्रसंयोगे उपवासो भवेद्यदा। पारणं तु न कर्तव्यं यावन्नैकस्य संक्षयः इत्यादि। यमेनाह। न
क्षत्रोपोष्य तिथेस्तिथि-श्रवणयोर्वा तिथौ व्रतं पारयेद् द्विजः। श्रवणद्वादश्यां उपोष्य तिथिभे द्वादश्यां अं
ते तिथिश्रवणयोर्वा अंते व्रतं पारयेत्। पारणांते व्रतं ज्ञेयमिति सूक्त्या पारणं कुर्यादित्यर्थः
अस्यापवादमाह स्कंदः। तिथ्यंते तिथिभांते च पारणं यत्र चोदितं। यामत्रयोर्ध्वगामिन्यां प्रात
रेव हि पारणा। भान्ते पारणं कुर्यादिना श्रवणरोहिणि भिन्नु केचित्। नारदीये। यदा न प्राप्य
ते ऋक्षं द्वादश्यां वैष्णवं क्वचित्। एकादशीं तदोपोष्य पापघ्नीं श्रवणान्वितां। उभयोर्देवता
विष्णुपुराणपुरुषोत्तमः। विभेदो न कर्तव्यो विभेदात्पतनं नरः इत्यादायेनाह। नंदायेत
श्रुतिपुष्करे कृतमिदं तथा पापीति। ऋतिः श्रवणः। यस्तूपवासद्वयासमर्थः स्वीकृतैकादशी
व्रतः सश्रयतं प्रत्याह। अथान व्रतो नंदायां समुपोष्य तां ऋतिहरो भुंजीत विष्णुर्चे कर्तुमापन्न
नंदायामेकादश्यामोचव्रतः। एकादशीमुपोष्य ऋतिहरो श्रवणद्वादश्यां विष्णुर्चकः
संत भुंजीत पारणं कुर्यादित्यर्थः। तथा च मत्स्यपुराणं। द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रव
णं यदि। उपोष्यैकादशीं तत्र द्वादशीं पूजयेद्धरिं देवतामिति। यस्तूपवासद्वयासमर्थः। अशक्त
ते कादशीव्रतस्तं प्रत्याह। चेत्रस्ते ज्ञाति तिथिव्रतो भवति योऽशक्त्या कादशी स्याद्धरावितिः। आचेत्र
तिथिव्रतः स्वीकृतैकादशीव्रतो वचेत्तर्हि भवति योऽएकादश्यशक्त्या कादश्यां व्रतं स्यात्। तथा
च पुराणं। एवमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत्। पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति
उपवासद्वयसमर्थं प्रत्याह। वाचस्पतिः कृतिपे व्रती तिथिजितेंद्रियो स्तिंथ्योः व्रती उपवासद्व स्यादित्य
र्थः। तथा च भविष्योत्तरे एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्। न तत्र विधिलोपः स्यादुभयो

56

द्वैवतं हरिरिति। अल्पश्रवणयोगेपि सकलायाः पुण्यत्वाभिधानेन तिथ्यर्धरात्रौ श्रवणयोगेपि स्याद्
पि प्रातः संकल्पयेद् द्वादश्युपवासव्रतादिकमित्युक्त्वा द्वादश्याः संकल्पं कुर्यादित्याशयेनाह। निशि तु श्र
वणे मुख्ये कल्पना निर्निमित्तं तु स्वेच्छया कल्पनं संकल्पनं कुर्यादित्यर्थः॥७८॥ इति श्रीकालनिर्णयदीपिकावि
वरणे श्रवणद्वादशीनिर्णयः॥७८॥ अथ शिवरात्रिनिर्णयः॥ माघमासस्य शेषे या प्रथमे फाल्गुनस्य च।

शिवरात्रिनिर्णयः॥

कृष्णचतुर्दशी सा तु शिवरात्रिः प्रकीर्तितेति। संहितावाक्यं प्रायेणाह। चित्रे या शिवरात्रिरित्यादिना माघे
चतुर्दशीति। माघे शीतभूतदिने कृष्णजन्तुपैति योगं यदि पंचदश्या। जयप्रयुक्तां न तु जातु कुर्यात् शि
वस्य रात्रिं प्रियकृच्छिवस्येति। वचनमर्धरात्रात्पुरस्ताज्जयायोगो यदा भवेत्। पूर्वविद्धैव कर्त
व्या शिवरात्रिः शिवप्रियैरित्यादिवचनपर्यालोचनेन पाद्मोर्धरात्रस्योपरि जयायोगो निषेधकमि

॥२४॥

त्याशयेनाह। असौ युक्ता चेज्जया निशीथसमयादूर्ध्वं तदान्यो दिने इति। असौ शिवरात्रिनिशीथ
समयादूर्ध्वं मध्यरात्रस्योपरि जयात्रयोदश्या युक्ता चेत्तदामावास्यायुक्तो दिने सेत्यर्थः। पूर्वैवापर

च ॥२४॥

थास्मदिति अपरथा अर्धरात्रस्योपरि जयायोगाभावे विकल्पास्यात् भवति तेषु पूर्वैव मुनिभिः स्म
तेत्यर्थः। यदा चतुर्दशी दिनद्वये प्रदोषव्यापिनी। त्रयोदशी दिनपर्याप्ता तदा त्रयोदशीयुतादेवि दिनश्रुति
प्रमाणतः जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशीति शिवरहस्यवचनात्पूर्वैव। यदा चतुर्दशी
पूर्वदिन एव प्रदोषव्यापिनी त्रयोदशीविद्धदिनपर्याप्ता तदा प्रदोषव्यापिनी ग्राह्या। शिवरात्रिः शि
वप्रियैः रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेदिति वचनात्पूर्वैव। यदा तु चतुर्दशी द्वि
तीयदिन एव प्रदोषव्यापिनी जयायोगश्चार्धरात्रात्पुरस्ताच्चेदिति वचनात्पूर्वैवेति भावः। पू
र्वविद्धोपवासे कृते तु चारस्मिन्दिने व्रतादि पिर्यदा त्राव पारस्तितदा कृष्णाष्टमी स्कन्दषष्ठी
शिवरात्रिश्चतुर्दशी। एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेदिति स्कान्दे विधानान्मध्य

५८

रात्रे प्रतितिथ्यंते पारण विधेया । भूताष्टम्यो दिवा भुंक्त्वा रात्रौ भुंक्त्वा तु पर्वणि ॥ एकादश्यादि
वा रात्रौ भुंक्त्वा चांद्रायणं चरेदि । कात्यायनवाक्येन अमावास्यायां रात्रौ यः प्राप्तो भोजननिषे
धस्तस्य प्रसंगतः प्राप्तभोजनविषयत्वाद्विधिस्पृष्टे भोजने निषेधाप्रवृत्ते विधिवैषम्य विक
ल्पादिप्रसंगाद्दीक्षणीयहिंसादिवदित्याभिप्रेत्याह । व्रततिथिलेरंते निशीथेपि वाक्षी
पादितिव्रततिथिश्चतुर्दशी प्रतिमासशिवरात्रिव्रतं तु यतः प्रतिचतुर्दश्यां पूजां पर्वे
नमेक्ताः तथा जागरणं रात्रौ संनिधौ मेरुतं तदा । तेन कर्मविपाकेन मुक्तो सोपातकै
नचेति । ईश्वरवाक्याज्ज्योपूजाजागरयोर्विधानाद्बहुरात्रियुता ग्राह्या । सामान्येन रात्रौ योगे ग्रा
सक्तिमंतित्रिशिवरात्रिश्च कार्या भद्रयान्वित इति वाक्यात्पूर्वेद्युर्व्याप्त्यभावेनाह । माघ
गतेन राशीत चतुर्दश्यां स्फरात्रिद्वये अस्तित्वे बहुरात्रियुक्तं अन्यतरासाम्ये तु पूर्व
स्मृतेति जन्माष्टमी रोहिणी च शिवरात्रिस्त्वेवच । पूर्वविद्धैव कर्तव्या तिथिभांते च
पारणमित्यादि विधानाच्छिवरात्र्यादिनिषेधव्रतेन स्वव्रते चार्थ्यं तेन स्वान्ते च पार
णमित्याह । इत्यादि सूत्रे तिथिभतेष्वपि तथैवास्य स्पष्टे पारणमिति ॥७॥ इति कालनि
र्णयदीपिकाविवरणे शिवरात्रिनिर्णयः ॥७॥ अथ पर्वनिर्णयः ॥७॥ तुर्यो द्विः खलु पर्वणः
प्रतिपदोप्याद्यास्त्रयो यागयज्ञः कालः प्रातरिति । पर्वणः पूर्णिमाया आमावास्याया वा तुर्यः श्चतु
र्थो द्विरंत्राः । प्रतिपदो प्याद्यत्वयोंशाए तावान् यज्ञो यागस्य कालः खलु । स च प्रातः प्रातः का
लेवर्तमानो ग्राह्य इत्यर्थः । खलुः प्रसिद्धौ तथा च प्रसिद्धिः । पर्वणोपश्चतुर्थो रात्र्याद्याः प्रति

पर्वनिर्ण
यः ।

पःस्वयः। यागकालः स विज्ञेयः प्रातरुक्तो मनाषिभिरिति कात्यायनवचनादिति भावः। ननु स्मा
र्शयागकाले गृह्यमाणे संधौ यजेतेति श्रुतिविरोधः स्यात्। एवं संधेरिति सूत्रस्य लात्तत
त्रसांगत्रयोगानुपपत्तेः संधिरावृत्तेन पर्वसंधिसन्निहितस्य कर्मानुष्ठानयोग्यस्य पूर्वापरकाल
स्यत्क्षितत्वात्। अत एव श्रुत्यंतरं संधिमभितो यजेतेति। तथाच बौधायनः। स्वस्मत्वासं
ध्विकालस्य संधेर्विषयत्वमुच्यते। सामीप्यं विषयं प्राह पूर्वेणाहापरेण वा। एवं संधिसन्निहितेदि
नद्वये कर्मानुष्ठाने प्राप्ते व्यवस्थामाह। श्रुतिः पूर्वेद्युरिध्माबर्हिः करोति यज्ञमेवारभ्य गृहीत्वो

॥१२५॥

पवसतीति। तथा। पूर्वेद्युरग्नीन्गृहीत्वोत्तरमहर्यजेतेति। गोभिलोपि। पक्षांते उपवस्त्वो
ख्याः। पक्षादयो भिपष्ठ्या इति। पक्षांताः पंचदश्यास्तास्वन्वाधानादिकं कर्तव्यम्। पक्षाद्यः
प्रतिपदस्तासु यागः करणीय इति यावत्। ननु श्वः संधौ यजेतेति श्रुतिः। पर्वणो यश्चतुर्थो
राइत्यादिस्मृत्युक्तपर्वचतुर्थांशादिकं यागकालं स्वीकरोतीति न विरोधः। तदेतदभिप्रेत्यो
क्तं तुर्यो ध्विरित्यादिना। अथ रात्रिसंधौ परेद्युर्यागः पूर्वस्मिन्नन्वाधानमित्याह अथ समय
विरतिमदपर्वाह्नितस्मिन् व्रतं श्वो यागः। रात्रिदर्शनेपीति। अथ या रात्रिस्तस्या विरतिः प्रव
सानं तदह सर्वपूर्णिमादर्शयोर्यस्मिन्नहनि तस्मिन्व्रतमन्वाधानं। श्वः परेद्युर्यागः। तथावलो
न्ति। अपराह्णे थवा रात्रौ यदि पर्व समाप्यते उपोष्यतस्मिन्नहनि श्वोभूते याग इष्यते इति उपोष्य
अन्वाधाय पूर्वेद्युरिध्माबर्हिः करोति अग्निमेवारभ्य गृहीत्वोपवसतीति। अन्यथा श्रुत्या अ
न्वाधायोपवस्तव्यमित्यर्थः। अल्पस्मृत्याद्युपपूर्वको वसतिरन्वाधानादिकर्मवाचकोत्रेपः। अ
माव स्मृतिः उपवृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह उपवासः स विज्ञेयः सर्वभोगविवर्जि
तइति।

॥१२५॥

तन्न्यायनिबंधकृद्भिः रूपवासतन्त्रांगो ऽन्वाधाने तत्र तत्र व्याख्यातः। अत एव निर्णयामृते तस्मान्नोप
वासादिगुणपुण्यकामिनामभिधानादुपवासवाचको ऽत्र शब्दोऽन्वाधानकर्मण्युपवासीयैरिति
इति दिक्। अथवा शब्दोपवससेनेति श्रुत्यान्वाधानोपवस्तव्यानित्यकर्मकं कर्तव्यं। त
थाचाह आश्वलायनः। अथ पार्वणस्थालीपाकस्तस्य दर्शपूर्णमासाभ्यामुपवासइति। एतदेव स्प
ष्टीकृतं गृह्यकारिकायां। गुंडीपागामहन्येवमांसमाषादिवर्जितं। निरूपयेच्छ रात्रौ यातां दंप
तीमैथुनं न चेति। ननु राज्ञोः पर्वसंधावप्रिययदि प्रतिपदि त्रिमुहूर्तादितीयात्वे तु प्रतिपच्चापरा
ह्णिकी। अन्वाधानं चतुर्दश्यां परतः सोमदर्शनादितिवचनात् पूर्वेद्युर्यागः स्यादितिचेत्। न। अग्नि
न्त्रेनविषये शास्त्रिसंधिशास्त्रस्य सावकाशत्वात्। अत एवाह व्याप्तिन्यां प्रतिपदि तु पक्षादयो
ऽनियतस्त्वप्यार्द्र्यनेन परदिने यागप्राप्तेः। पूर्वदिने प्रातःपर्वे चतुर्थांशाभावाद्यागासंभवाच्च
नात्र सावकाशं। अन्वाधानन्यथासिद्धत्वाद्दर्शने वत्याप्रतिपत्तिपदि यागप्राप्त्यर्थं प्रवृत्तं
गात्रसंधिशास्त्रदृष्ट्वा त्रिमुहूर्तादि शास्त्रस्य विषयान्तरमेवान्वेषणीयं। तदेतदभिप्रेत्योक्तं हे
चिदर्शनेपीति। अमिद्दर्शने सत्यपि परेद्युर्यागइत्यर्थः। अपराह्णेपि पर्वसंधौ परेद्युर्यागइ
त्याह। अथ अवेक्षावर्तनाद्धूर्ध्वतः पर्वतिः परतोपज्ञेति। आवर्तनात्संधिर्यदावर्तनात्प्रमुक्त
त्वात्। पूर्वाह्णे पराह्णेपोसंधिरावर्तनं। अहोमध्यमित्यर्थः। तस्मादूर्ध्वं तु परिः अपराह्णइतिपा
वत्। परतः परदिने। अपि तु पूर्वेद्युरन्वाधाने अपराह्णे पर्वणो इत्यादिवचनादिति भावः
त्रिमुहूर्तादितीयात्वे इत्यादिवचनात्। अथ परस्त्वर्थे चतुर्थे नो यागे प्रतिपद्वृद्धौ विस्तरश्च
सितं द्विमुपनिष्कृतिरेषा सनातनीत्यादिवचनविषयादपराह्णसंधिशास्त्रं त्रिमुहूर्तादि
शास्त्रविषयं परत्वप्रवर्ततइत्याशयेनाह। प्रतिपत्स्वर्थे यों चिंति द्विसृजां। स्याचेत्

(५०)

॥२८॥

त्रतदादिमेज्य विहितेयं न्नोपजेत्पूर्वणमिति । अन्याश्चिः श्चलुर्योशाः तच्चपरदिने । आदित्येस्तुमि
ते यद्दिः प्रक्षीणकुदियाच दि प्रतिपद्यतिपत्तिः स्यान्त्वेच दर्शयांतनोपजेशात थापर्वणो नीत्वतीये
तु कर्तव्येष्टिर्द्विजातिभिः द्वितीयासहितं यस्मात्तु पर्यस्याश्चलापनात् इत्यादिशास्त्राद्विहितेप
पर्वणो नो आदिमदिवसे यजेदित्यर्थः अर्थात्पूर्वेद्युरन्वाधानं इष्टेयं पूर्वाह्णे थवा मध्याह्ने यदि
पूर्वसमाप्यते तु पोष्यतत्र पूर्वेद्युस्तदहर्यागइष्यत इति लोगाक्षिवचनमभिप्रेत्याह । घ्लावर्तनि
योस्तु पर्वविरतौ या गोष्ठिनस्मिन्नध्वमिति । आल्लावर्तनयोः पूर्वाह्णमध्याह्नयोस्तु पर्वविरतौ
पर्वावसाने ध्रुवं निश्चितं तस्मिन्नहि संधिदिवसे यागः अर्थात्पूर्वेद्युरन्वाधानं इष्टे प्रतिप
तिपद्यप्रविष्टायां यदि तिथिः समाप्यते पुनः प्रतिपत्क्षयेनेष्टिं ततः कुर्यात्पुनान्यथेति गर्गवच
नेन पंचदश्यामिष्टिसमाप्तौ पुनर्यागविधानात् । प्रमादमोहिमपष्ट्याद इति वचननियमाच्च । प
रेद्युर्याग इति केचिच्चिन्मतं तच्चिंत्यं मुख्यं द्वितीयाचेत्यादिबहुवाक्यविरोधात् अतिदुर्बलमित्या
शयेनाचार्येरुक्तं ध्रुवमिति । यदा संपूर्णचतुर्दशी पंचदशी प्रतिपच्चास्तमयात्पूर्वं समाप्यते द्वि
तीयाप्रभृत्यायतिक्षयस्तदा पूर्वेद्युरेव याग इति अभिप्रेत्याह । सायाह्नगापिपर्वणः प्रतिप
घश्चात्तु प्रतिपदाप्रभृत्यतापचये तिथेर्यजिरमावास्यादिने च स्मृत इति । सायाह्नगापिपिन्नां
तास्तूर्वे पर्वणोमावास्यायाः प्रतिपदश्चात्ते द्वितीयाप्रभृति तिथेरत्यंतापचये पवसतिअग्रामि
न्नमावास्यादिने यजेद्यागो मुनिभिः स्मृतः । तथास्मरणी चतुर्दशीतु संपूर्णा द्वितीयाक्षयगा
भिनी चरुरिष्टिरमावास्याप्रतेकव्यादिकीर्तिये ति । प्रातर्पंचपराह्णसंधिषु यजेः कालाध्य
हे स्यात्पाने वृद्धभयत्र पूर्वदिवसे यागस्तदा पौष्यत इति । पंचपराह्णसंधिषु सस्तु यजेयां

॥२८॥

(57)

गस्य कालः। अहे दिनद्वये प्रातः प्रातःकाले स्यात्। तथापराह्णसंधिषु सत्सु उभयत्र दिनद्वयेप्येवं
स्यात्। न स्यादेव तदा पूर्वदिवसे याग इष्यत इत्यन्यपरागद्दमात्रं कृत्वा। यदा पूर्वदिने प्रातः पर्वच
तुर्थांशे उत्तरदिने च प्रतिपत्तृतीयांशे स्यात्तदा अपराह्णसंबन्धित्वात्परेद्युर्याग इति प्राप्तं तच्च
चतुरस्त्रं त्रिमुहूर्ता द्वितीया चेत्स्यादिबहुवाक्यविरोधात्। तथा। पर्वणोंशे तुरीये तु कर्तव्ये
ष्टिर्द्विजातिभिः। द्वितीयासहितं यस्माद्दूषयंत्योश्चलाघनाइति पूर्वेद्युर्यागविधानाच्च। ततश्च
पूर्वेद्युर्याग इति। तथा। यदा पूर्वदिने पर्वतृतीयांशः परेदिने प्रतिपच्चतुर्थांशः तदा दिनद्वयेपि
प्रातर्नुस्य कालाभावे दर्शपूर्णमासविधायकवचनसामर्थ्यात्। पर्वतृतीयांशो प्रतिपच्चतु
र्थांशो वा विकल्पेन यागे प्राप्ते न पञ्चदश्यां चतुर्थांशो इति प्रतिपच्चतुर्थांशे यागस्य निवारितत्वाच्च
पर्वतृतीयांशे एव यागो युक्त इति। चंद्रदर्शनेन दिने यागस्य निषिद्धत्वात् ज्ञानाकरणेन चपर्व
यद्यत्रान्याकरोति तदा यजनीयेह्नि सोमश्चेद्वारुणपांदिशि दृश्यते तत्र व्याहृतिभिर्हुत्वा द
ण्डं दत्वा द्विजातय इति कात्यायनवचनमन्वाह। कुर्याद्व्याहृतिहोमयुक्तितरणं मोहाच्चडो चेद्दि
नेचंद्रदृश्यावतीति। वितरणं इदानीं चंद्रदृश्यावतिचंद्रदर्शनेन युक्ते। पर्वणि अत्ययेपि यज्ञोत्तरणं पक्षे
तोऽहिते यज्ञियागः तत्पूरणं यागसमापनं। पक्षतौ प्रतिपदि। तु विशेषे। अपिः संभावनायां य
था प्रतिपदि यागे क्रियमाणे तत्रैव यज्ञसमाप्तिः क्रियते तथैव पर्वणि अपद्यपि संभावि
ता तथा। विप्रतिपद्य प्रतितिष्ठा यामिति वचनेन पर्वणि अपि यागसमाप्तौ पुनर्यागविधाना
त्प्रतिपद्येव समाप्तिर्युक्तेति विशेष इति भावः। तथा च कालनिर्णयकाराः प्रातःकालस
माप्तिवर्जं सर्वं निर्वर्त्य विरम्यं संस्थापयेत्तं प्रतीक्ष्य संधिरूपां परि प्रतिपत्काले समाप्तिपदा

र्थ एव कर्तव्य इति। तिथेः परस्याश्च टीकास्तु या स्युर्न्यूनास्तथैवाभ्यधिकास्तु तासां। अर्धं
विंयोऽयं च तथा प्रयोऽयं ह्रासयुक्तो प्रथमे दिने तु इति स्मृतिमभिसंधाय तद्दिनेन पर्वसंधि
ज्ञानं कार्यमित्युक्तं भवतीति कालनिर्णयकारोक्तिमभिप्रेत्याह। चिंचा पर्व समाप्तिमुच्चरार्
धे र्द्धे वृद्धेः क्षयस्यादिमे। प्रक्षिप्याह्निदर्शितिथिउ चरतिथेः प्रतिपदो वृद्धेः क्षयस्य चार्द्धे आदिमे
पर्वदिने प्रक्षिप्य प्रयोज्य पर्वसमाप्तिं चिंचा ज्ञानीयादित्यर्थः। आवर्तनि स्तु पूर्वाह्णोपरा
ह्णस्तु तत्पर इति वचनादह्नो द्विधा विभागोयः स पर्वनिर्णये ज्ञेय इत्याह। द्विधा त्रिदिवसः प्रा

॥१२॥

ह्णापराह्णावितीति। अत्र पर्वनिर्णये प्राह्णः पूर्वाह्णः इति प्रकारो यातो मध्याह्ने संधिश्चास्त्र्यं पूर्वा
ह्णापराह्णयोः यः संधिस्तत्र यदा पर्वप्रतिपदोः संधिस्तत्परं। ततश्च मध्याह्नशब्दः पारिभाषि
कं मध्याह्नपरित्यज्य अह्नो मध्यमेव प्रतिपादयति अतएव शातातपा मध्यमपदमेव पठ

॥२॥

ति। पूर्वाह्णे मध्यमेवापि यदि पर्व समाप्यते। तदोपवासः पूर्वेद्युस्तदह र्यागइष्यत इति। तस्मात् पू
र्वाह्णापराह्णवित्यनेनैव प्रकारेण द्विधा दिवसः पर्वनिर्णये ज्ञेय इत्यर्थः। सद्यस्कालमाह। स्या
दावर्तनसंगवांतरथ चेद्राकाक्षय स्तत्र वा सा स्वाधानयज्ञे विधानमिति। अथावर्तनि संगवयो
रंतर्मध्ये राकायाः पूर्णिमायाः क्षयः अवसानं चेत् तदानंत लिप्पूर्णिमायां साग्न्याधानस्य याग
स्य विधानमनुष्ठानं वा विकल्पेन स्यादिति। तथा च कात्यायनः। संधिश्चेत्संगवादूर्ध्वं प्राकप
र्यावर्तनाद्रवेः। सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिः। एतच्च विधानं वैकल्पिकं सद्य
स्कदा वा क्रियते समस्तामितिवचनादिति भावः। स्वर्विकीं तन्निर्णयेवाह। अथ यंत पूर्वाह्णसाका

क्षयः। तस्यां वाजसनेयिनामभिमतं स्यात् सर्विकायां व्रतं श्वो यागइति। पूर्वाह्णे राकाक्षयः श्वो
द्रुवति सा खर्विका। अन्वाधानं स्यां खर्विकायां व्रतं श्वो यागइति वाजसनेयिनामभिप्रेतमित्यर्थः
तथा भाष्यसंग्रहकारः। मध्यंदिनात् स्यादहनी यस्मिन् प्राक्पर्वणः संधिरिष्यते तृतीयाः सार्विकी
का वाजसनेयिनाम् त्वात् स्यामुपोषथ परेद्युरिष्टिरिति। एवं प्रकृतिनिर्णयमुक्त्वा विकृतिनिर्ण
यमाह। चिरमे चेत् पर्वत नर जेरावर्त्तनमादूर्ध्वेत। आदौ स्यादिकृतिः पशुस्तमनुवान्वाधानम
न्वाद्यथ प्रागाधर्चनतानस्तु पर्वविरतौ पश्चादिकं चैकृतौ। कर्त्तव्यं प्रकृतिष्टयनंतरमितितांत
रणौ स्वर्यस्यः अन्याह्नि अपराह्णसंधिदिने। तथाचोक्तं। अर्धाद्दह्नोभवतिनिपतं पर्वसंधिप
रस्ताच्चैव तस्मिन्नहनि तु पशुसघ एव यद्देवा। आरभ्याथ प्रकृतिरथ येन पर्वसंधिपुर
स्तात्चेत्तास्मिन् प्रकृतिमथ तु स्यात्पशुसघ एवेति। पूर्वाह्णसंधौ विहितकालसंभ
वात् सघ एवेत्युक्तं। अयं च विहितविशेषकालस्तु विकृतिषु च निर्णयः। यत्र तु कालविशे
षो ग्रहकालस्तं वाश्रयते न तत्रैतथैवानुष्ठानमित्यवगंतव्यमिति कालनिर्णयकारोक्तेरिता
भावः। यच्च विदत्तपूर्णमासविध्यतिदेशात्पश्चादिविकृतेः पर्वचतुर्थाराशादिकाले प्रति
भाति तथापि यदीष्ट्या यदि पशुना यदि सोमेन यजेतामावास्यायां चैव पौर्णमास्यां वा यजेत
त्यापस्तंबेन विकृतौ कालविधानात् पंचदश्यामेव यागसमाप्तिस्त्वाद्यादौ स्यादिकृतिरि
त्यादिना। अर्थादुक्तमेवेतिज्ञेयं। आग्रयणेष्ट्याः कालविशेषमाह। अथोपूर्वाह्णपर्वक्षये दर्शे
ष्ट्याः परमुक्तामाग्रयणाकं प्राक्पूर्णमासाद्यतन्द्द्रति। तथाच वृत्तिककारः। यद्वेत्वपूर्वपौ
र्णमासादूर्ध्वं दर्शात्त्रवेऽपपेति। नवेऽप्याग्रयणेष्टिः। अन्वाधानदिने कुर्यादित्याह। परिशा

ग्रहणनिर्णयः॥

ष्टे। शाकं मांसं मसूरं च चरकंकोरदूषकान्। माषं मधु परान्नानि वर्जयेदोपवस्तके इति॥ ७ ॥ इ
ति श्रीकालनिर्णयदीपिकाविवरणे पर्वनिर्णयः समाप्तः॥ ७ ॥ अथ ग्रहणनिर्णयः॥ नाश्नीयाद्ग्र
हणे ग्रहप्रहरतः पूर्वं चतुष्टं रवेर्यामानां ग्रहणे त्रये च त्रीन्निन इति। रवेर्ग्रहणे ग्रहप्रहरतो ग्रहणप्र
हरात् पूर्वं यामानां चतुष्टं त्रीन्नो ग्रहे त्रये च नाश्नीयादित्यन्वयः। तथा च वृद्धगौतमः। सूर्यग्र
हे तु नाश्नीयात्पूर्वं यामचतुष्टयं। चंद्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरान् विना। ग्रहणं तो गवे
दिदोः त्रयमादधियामतः। भुंजीतावर्तनात्पूर्वं प्रथमे प्रथमाद्ध इति। मार्कंडेयवचनेन य
स्मिन्यामे ग्रहणं तस्मात्पूर्वं यामत्रयं परित्यज्य भुंजीत तु चतुर्थे भवतीति कालनिर्णयकृद्भिः

॥२८॥

व्याख्यातं अतएव ग्रहप्रहरतः इत्युक्तं। ग्रस्तास्तगयोस्तु नो दृष्ट्वा मुक्त्यपरे द्विभोजनमिति। अन्यस्य
ग्रस्तास्तमाचं नयन्त इति अर्थाक्षिप्तयोः चंद्रसूर्ययोर्ग्रस्तास्तमितत्वे तो चंद्रसूर्यो दृष्ट्वा अ
मुक्त्यस्नाचापरे ह्नि भोजनं कुर्यादित्यर्थः। तथा चोक्तं ग्रहकाले तु नाश्नीयात्स्नात्वाश्नीयात्तु मु
क्तयोः इत्युक्तं स्नात्वा दृष्ट्वापरेह्नि घातग्रस्तास्तमितयोः स्नायोः तयोः सूर्यॆन्दोरिति। अथ
वृद्धातुरस्त्र्यर्भकाः प्राक्त्रयाधूर्ध्वग्रहयामतः प्रहरकमिति। तर्हि अर्भका बालाः नाधुर्नं भुंजीरन्
सायाह्ने ग्रहणं चेत्स्यात् पराह्णे न भोजनं अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे। भुंजीत संग
वे चेत्स्यान्न पूर्वं भोजनक्रियेति मार्कंडेयवाक्यं वृद्धादिविषयं। बालवृद्धातुरेष्विति वृद्ध
गौतमोक्तेरिति भावः। अथाप्युत्तरार्थे चेद्गृहीतिः स्यात्प्राक्प्रहरो ग्रहश्चि परतो वा यदा सन्नो
पावसे दिश्चि चेत्तु च वान् गृहीत हि ग्रहात्प्राक्प्रहरो प्रहरद्वयं हित्वा त्यक्त्वा परत श्च वा
ग्रहणादूर्ध्वे मिश्चिवाआचारत् आश्नीयात् नोपवसेत् उपवासं न कुर्यादित्यन्वयः। तथा
स्मृत्यन्तरे। सायाह्ने संगवे श्नीयात् प्रातः संगवादधः। मध्याह्ने परतो श्नीयान्नोपवासो रवे

॥२८॥

ग्रहे । आरदोपवासः । यदापराह्णोपवासारद इति श्रुतेः । रविग्रहे इन्दोर्ग्रहस्याप्युपलक्षणं ।
एतच्च पुत्रवद्गृहिविषयं । आदित्येऽहनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः । पारणं चोपवासं च न कुर्यात्पु
त्रवान्गृही इति जैमिनिना तस्यैवोपवासनिषेधोक्तेरिति भावः । ननु यदा रवेर्ग्रस्तास्तमयस्तदा
दिवाभोजनं निषिद्धं । संध्याकाले यदा राहुर्ग्रसते चन्द्रभास्करौ तदा दिवा न भोक्तव्यमातुरस्त्री
शिशून्विनेति स्मृतेः । न च रात्रौ । अमुक्तयोरस्तंगतयोर्दृष्ट्वा स्नात्वा परेऽहनीति वचनात्
। नाप्युपवासः पुत्रिगृहिणस्तन्निषेधात् अतस्तेन किं कार्यमुच्यते तदा सायाह्ने ग्रहणे चेत्स्या
दिति पक्षत्रयमाश्रयणीयमिति कालनिर्णयकाराभिप्रायेणाह । ग्रस्तस्यास्तमयो रवेर्यदि तदा पूर्व
समामं ग्रहात् । मुक्तौ चादिति । स पुत्रवद्गृही चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुद्ध्यतीति । तस्मिन्ने
व दिने भुक्त्वा त्रिरात्रेण विशुद्ध्यतीति कात्यायनेनोक्तं प्रायश्चित्तमाह । ग्रहकाले भुक्त्वा तालवा
न्न कार्यं चरेद्यदि मेनिं चेत्स्यात्तमपेशानं यदि तदा शुध्येन दर्द्धं चरेदिति । कार्यं प्राजापत्यं । तदर्ध
त्रिरात्रं । शुद्धौ प्रायश्चित्ताय । आतुरस्त्रीशिशून्विनेति आतुरादेर्भोजननिषेधपर्युदासा
दत्त्वा प्रायश्चित्तं त्वाकि विषयमित्यन्त्रायेन बलवानित्युक्तं । नित्यं द्वयोरयनयोस्तथा विषुवयो
र्द्वयोः । चन्द्रार्कग्रहणयोर्व्यतीपाते तु पर्वसु अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपं । यः करो
ति प्रयत्नात्तस्य स्यादक्षय्यं च तदित्यात्रायेनाह । पुण्यं भोक्तम भोजनं ग्रहदिने पुत्री तदेव चान्द्र
त्रिप्रयन्नालात स्य स्याद्दक्षयं च तदिन्यात्रायेनाह । कार्त्तिकादिवसर्पस्य निवृत्तिः पापकर्
ण्मिति एकरात्रमुपोष्यैव स्नात्वा दत्त्वा च शक्तितः । कान्तुकादिवसर्पस्य निवृत्तिः । स्नात्वा दत्त्वा च विधिवत् मोदते ब्रह्मणा सहे
त्रातः । त्रिरात्रं समुपोष्यैवं ग्रहणे चन्द्रसूर्ययोः । स्नात्वा दत्त्वा च विधिवत् मोदते ब्रह्मणा सहे त्रातः बालिनां पापाहानि स्मृतमिति । चान्ति
तिलिंगपुराणमपि त्रेस्याह । तस्मात्पूर्वे दिनत्रये वबालिनां पापाहानि स्मृतमिति । तद्ग्रहदिनमारभ्य पूर्व
तद्व्युत्क्रम्य चाह । बालेनापि स्युक्तं । तस्मादितिस्पबलोपेपं च मी । तद्ग्रहदिनमारभ्य पूर्व

॥१२८॥

शुक्लि शुद्धि नेष्टित्यर्थः। व्यासोर्कस्य रवे र्विधौ च राहिणः स्याद्ये सूचूडामणिः तत्रानंतफलमिति
रवौ आदित्यवासरे। विधौ सोमवासरे। तथा च व्यासः। रवि ग्रहः सूर्यवारे सोमे सोमग्रहस्त
था। चूडामणिरिति विख्यातः तत्रानंतफलं ध्रुवं इति। ग्रहो यदि भवेच्चूडं प्रयागे वर इति। सूर्य
चंद्रयोर्ग्रासः प्रकृतेः। स यदि कुजे कार्त्तिके भवेत् तदा प्रयागे वरः श्रेष्ठः। तथा च देवीपु
राणे। कार्त्तिके ग्रहणं श्रेष्ठं गंगायमुनसंगमे। गंगायमुनयोर्मध्ये सर्वोद्भवो विशेषये कथ व
द्ववती निर्णय कयद्भाव:॥७॥ मार्गशीर्षग्रहणे क्रमाक्षु भतमाः स्पृष्टे वे कान नर्मदातटधर्मनिहिताभि
धाय वरणा प्रोक्ता सरस्वत्यथ। आगायीं चंद्रपदात्परतश्च परतः स्यात् कौशिकी तापिका
सिंधुर्गंडकिका क्रमाच्छ्रयः पुण्येति। मार्गशीर्षे मार्गशीर्षादि मासे। गंगा चंद्रपदात्परार्धं
द्रभागेत्यर्थः। शुभतमाद्यनेन ग्रहपाठात्र मकल्यं सूचितं। पुण्यमित्यनेन श्रेयोजनकत्वं
एक क्रमादिति पदं मासक्रमद्योतकं। द्वितीयं नदीक्रमद्योतकं। तथा च देवीपुराणे। मार्गे तु
ग्रहणे प्रोक्ता देविकायां महामुने। पौषे तु नर्मदा पुण्या माघे संनिहिता शुभा। फाल्गुने व
रुणा पुण्या चैत्रे पुण्या सरस्वती। वैशाखे तु महापुण्या चंद्रभागा सरिद्वरा। ज्येष्ठे तु कौशि
की पुण्या आषाढे तापिका नदी। श्रावणे सिंधुनामा तु तथा भाद्रे च गंडकी। आश्विने त्वायू
श्रेष्ठेति। अथ सर्वाः शुभाः गंगाद्याः सकलग्रहे इति। तथा मत्स्यपुराणे। गंगाकनख
ले पुण्ये प्रयागे पुष्करं तथा। कुरुक्षेत्रं तथा पुण्यं राहुग्रस्ते दिवाकरे इति। तथा च व्यासः। सर्वं भू
मिसमं दानं सर्वे ब्रह्मसमा द्विजाः। सर्वं गंगासमं तोयं राहुग्रस्ते दिवाकरे। इंदोर्लक्षगु
णं पुण्यं रवेर्दशगुणं ततः। गंगातोये च संप्राप्ते इंदोः कोटी रवेर्दश इत्यादि। अथ फलं स्नादि
ना

॥१२८॥

कर्मग्रहेणाभावपितितथाचदेवलः। यथा स्नानं च दानं च सूर्यस्य ग्रहणे दिवा। सोमस्यापि तथा रात्रौ
स्नानदानं विधीयत इति। अथ पित्र्यमत्र ननु पादमेन हुत्वाथवेति पित्र्यं श्राद्धं। कात्यायनः। अ
पघनं ग्रोतीश्चैव चंद्रसूर्यग्रहे तथा। आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वेति।। काले याव
ति शास्त्रतः सुविदितोदकस्नानयोग्यो पि वा श्रोभः पुण्यकरो ग्रह इति। शास्त्रतो यो ति शा
स्त्रात् यावति यावत्प्रमाणे काले ग्रहः सुविदितः प्रतीनः दकस्नानस्य योग्योपि वा यावति का
ले भवति तावति काले पुण्यकरः श्रोत इत्यर्थः। तथा च कालनिर्णयकारैः। संक्रांते पुण्यका
लस्तु षोडशोभयतः कलाः। चंद्रसूर्योपरागेषु यावद्दर्शनगोचर इति जाबालिवचने यावद्द
र्शनगोचर इति पदमाक्षिप्य निर्जितं तस्माद्यावति काले चंद्रसूर्योपरागः शास्त्रप्रतीतः ता
वत्पुण्यकाल इत्यर्थः। पदार्थस्य रूपतश्चाक्षुषज्ञानविषयत्वयोग्यता विवक्षितेति केचि
त्। अथ फलोदेशोनरस्थः स्वचेदिति। सूग्रहः। तथा च षट्त्रिंशन्मते। सूर्यग्रहो यदा रा
त्रौ दिवा चंद्रग्रहस्तथा। तत्र स्नानं न कुर्वीत दद्याद्दानं च न क्वचित्। स्पर्शे स्याप्लुतिरत्र मध्य
समये होमामरार्चे स्मृते दानं स्यात्खलु मुच्यमानसमये मुक्तौ पुनश्चाप्लुतिरिति। अत्र
ग्रहे आप्लुतिः स्नानं तथा च अत्रिकेवचो। स्नानं स्यादुपरागादौ मध्ये होमं सुरार्चनं। तथा
च वचनोतरं। ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते। मुच्यमाने भवेद्दानं मुक्ते स्नानं
विधीयत इति। अन्नं पक्वमिह त्यजेदिति। इह ग्रहणे। तथा च षट्त्रिंशन्मते। सर्वेषामेव वर्णा
नां सूतकं राहुदर्शने। स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेदिति। शृतं पक्वं। सवस
नं स्नानं स्मृतं च ग्रह इति। तथा च वृद्धवसिष्ठः। सर्वेषामेव वर्णानां सूतकं राहुदर्शने।।

सचैलं तु भवेत्स्नानं सूतकान्नं विवर्जयेदिति। अथार्थेनोपि राहुदर्शने सद्य एव स्नानादिकर्म स्मृतमिति।
तथा च लिंगपुराणे। चंद्रसूर्यग्रहे स्नायात् सूतके मृतके पि च। अस्नायी मृत्युमाप्नोति स्नायी पा
पं न विंदतीति। आदित्याष्टे न होमादि त्याज्यं च षट्त्रिंशन्मते। स्पार्श्वकर्मपरित्यागो राहोरन्यत्र
सूतक इति। राहुसूतकं विनान्यस्मिन् सूतके इत्यर्थः। ज्येष्ठामित्रभवैश्वदेवहरिभब्राह्मश्रवि
ष्ठासु चेच्च शार्कग्रहणं शुभावहमिति। मित्रश्च मनुराधा वैश्वदेवमुत्तराषाढा। हरिभमभिजि
त् श्रवणौ। ब्राह्मं रोहिणी। श्रविष्ठा धनिष्ठा। तथा च गार्ग्यः ज्येष्ठा ब्राह्मं तथा मैत्रं ब्राह्मैश्वं वा
सवं तथा। वैष्णवं वैश्वदेवं च पुरुहूतस्य मंडलं। मंडलेस्मिन् समुत्पन्नं ग्रहणं जगतां शुभं।
आनंदं सर्वभूतानां विदध्यादिति विशेषतः अतोन्यत्राशुभं अतोन्यत्र एतद्व्यतिरिक्तेषु नक्षत्रे
षु। तथा च गर्गः। तिष्यमाजपदं चैव याम्यं भाग्यं च पैतृकं। एतानि मग्निदैवं च सप्तैतान्यनलोग
णः। अनले मंडले दृष्टं ग्रहणं चंद्रसूर्ययोः। राज्ञां भयकरं विद्यात् प्रजानां बहुदोषकृत्। आर्द्रा
श्लेषं तथापौष्णं मूलमाप्यं च शांकरं। वारुणं सर्वदैवत्यं वारुणं मंडलं स्मृतं। एतस्मिंस्तु परागः
स्यान्मंडले चंद्रसूर्ययोः। दुर्भिक्षमामयं नाशमस्तं प्रजानामिति निश्चयः। कृत्तिका अर्यमा ह
स्तश्च चित्रा च पुनर्वसुः। सौम्यं चैवाश्विदैवत्यं वायव्यं मंडलं भवेत्। सामयं सभयं चैव दुर्भि
क्षं कुरुते विराट्। स्वाधिष्ठानाधिकाय च मंडलेस्मिनुपरक्तः इति। तत्र तु स्थापालो विदध्यात्तत्रां
दः सदा। स्यान्नवम्यामेकखुरं दशम्यां द्विखुरं बहु। एकादश्यां तथा रूप्यं
ब्रह्मवर्चस्विनः सुतान्। द्वादश्यां जातरूपं च रजतं कुप्यमेव च। जाति

॥४६॥

(९१)

स्यां क्षपते नरः। अथ स्यामपि वा पिंड्यं च क्षपते श्राद्धदः सदा। स्याअव स्यामेकरवुरुंद्र त्राम्यां
द्विरवुरंबहुपकारदस्यां तथा कृष्णपक्षे ह्मव र्वे त्रिवे नः सुतान्। द्वादश्यां जातरूपं च रजतं
कुप्यमेव च। ज्ञातिश्रैष्ठ्यं त्रयोदश्यां चतुर्दश्यां तु कुप्रजाः। प्रीयन्ते पितरस्तस्य ये
वशस्त्रहतारणे। इत्यादि स्वविनिर्दिष्टान्विपुलान्मनसः प्रियान्। श्राद्धदः पंच
दश्यां तु सर्वान्कामान्समश्नुत इति। वंदिन स्नानकारः। विष्णुधर्मोत्तरे। आरोग्य
मयसौभाग्यं समरे विजयं तथा। सर्वान्कामांस्तथा विद्यां धनं जीवितमेव च।
स्यादिसादिदिने वेवं श्राद्धं कुर्वन्सदा नरः। क्रमेणैतदवाप्नोति नात्र कार्या विचा
रणेति। सार्पब्राह्ममघाकरारविदिने सुश्वेतद्वीपे श्विनः पुत्रार्थी विधिना सम
र्ध्यत पनं श्राद्धं चरेन्मध्यमं पिंडं प्राश्य समापयेदिति। तथा च भविष्यपुराणे।
पंचतारं भवेद्यत्र नक्षत्रं गोवृषध्वज। वारे तु देवदेवस्य वासरः पुत्रदः स्मृतः। उप
वासो भवेत्तत्र श्राद्धकार्यं तथा भवेत्। प्राशनं चापि पिंडस्य मध्यमस्य प्रकीर्ति
तं। सोपवासस्तु वैश्य पुत्राय जनयेत्तत्र गोपतिमित्यादि। पंचतारं। रोहिण्याश्लेषामघा
हस्तारव्यानि नक्षत्राणि। [illegible] गोगोर्वृषः स ध्वजो यस्य सः। उपवासः इ. निमारे।
तत्र श्राद्धदिने विधिः कालनिर्णये ज्ञेयः। अपरवोसप्रभ्यमे दीकुजे स्याच्चेद्
न तिथिर्मृगौ कुजदिने वा चेच्चतुर्थी भवेत्। एता स्युस्तिथयः सुभाः पितृयजौ

92

विति। तथा च स्कंदपुराणे। अमायां यदि सोमः स्यात् सप्तम्यां वै दिवाकरः। चतुर्दश्यां चतुर्थ्यां च
वासरो मंगलस्य तु। तदा श्राद्धं प्रकर्तव्यं पितॄणां तृप्तिमिच्छता। षष्टिवर्षसहस्राणि ष
ष्टिवर्षशतानि च। नंदंति पितरस्तस्य विमानवरमाश्रिता इति। तथा ब्रह्मपुराणे।
शुक्लांगारकयुक्तायां चतुर्थ्यां जायते यदा। श्राद्धं यः श्राद्धकृद्विप्रो न प्रेतो जायते न्वय इति। नांदीकांतु त्रि
काश्च पुनर्नांदीमुखसंज्ञकाः परतरा उक्तान् प्रोष्ठपद्यां जयेत् श्राद्धवरूपमिति। तथा च ब्रह्मपुराणे। नांदी
मुखानां प्रसंगं कन्याराशिगते रवौ। पौर्णिमास्यां तु कर्तव्यं वराहवचनं यथा। ये स्युः पितामहा
दूर्ध्वं ते स्युर्नांदीमुखास्त्रय इति। पितामहस्त्वाद्येन प्रपितामहा लक्षणीयः तदुक्तं। पिता पितामह
श्चैव तथैव प्रपितामहः। त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकीर्तिताः। तेभ्यः पूर्वे त्रयो ये तु ते तु
नांदीमुखास्त्रपीडयं नांदीमुखसंज्ञा भाद्रपदपूर्णिमानिमित्तश्राद्धविषयस्तु अन्य नांदीश्रा
द्धे यत्तन्न ग्राह्य इत्याह। अथान्य नांदीकाविधौ पित्रादिकास्त्रिनिवृत्ते तथा च कालनिर्णयकारः।
अस्य नांदीमुखत्वं वचनस्य तत् पौर्णमासीनिमित्तश्राद्धविधिनैकवाक्यता प्रद्वात्तरनांदीमु
खसंज्ञं न प्रपितामहात्मरत्र येन ग्राह्य इति। श्राद्धं हि समयात्स्मृतानीति। अनेन प्रकारे
णामावास्यादिश्राद्धकालो निरूपितः। अथ सामान्यतः श्राद्धतिथिकालनिर्णयः। तत्र पू
कस्मिन् श्राद्धखंडतिथिका ग्राह्या सहयस्मिन् बहुप्राह्णगा तिथिः सा काल इत्युक्तं पार्वण पा

।१४७।।

।८५।

प्र। सामान्यतः श्राद्धकालनिर्णय।।

इति॥ तथा च दक्षः पूर्वाण्हे दैवकार्याणि मनुष्याणां तु मध्यमे। पितृणां चापराह्णे तु कार्याणि
तानि यत्नतः॥ इह अपराह्णस्य प्राशस्त्यात्तद्व्यापी निर्णायक इत्यर्थः। यदा दिनद्वये अपराह्णव्यापि
नी अव्यापिनी वा तदा तिथिक्षये पूर्वैव साह्व्याप्यास्तु वृद्धौ गापराह्णसमयेनास्त्येव व्यास
यदि ग्राह्या पूर्वदिनक्षयो यदि तिथिरिति तथा च मनुः। यस्यामस्तं रविर्याति पितरस्ता
मुपासते। सा पितृभ्यो यतो दत्ता ह्यपराह्णः स्वयंभुवेति। यस्या अपराह्णसंबंधः सा तिथि
स्तमयात्पूर्वत्र सा पितृकार्ये ग्राह्येत्यर्थः। यत्तु कपा दिनद्वये काकव्याप्तिविषयं। सायं
ह्नव्यापिनी या तु पार्वणे सा उदाहृता सो दिगाषिलादिवाक्यं जातं तु अपराह्णव्याप्त्य
भावविषयमिति भावः। यत्तु यस्यामस्तं रविर्याति इसनेनापराह्णव्यापिनी ग्राह्येत्युक्तं
अतो दिनद्वये अपराह्णव्याप्त्यभावे श्राद्धं न कार्यं अनधिकारादिति प्राप्ते आह। किंतु ति
थ्यादिषु भवेद्यावान्ह्रासो वृद्धिः परेहनि तावान्ग्राह्यः स पूर्वेद्युः रहस्यापि नव कर्म
णीति वचनात्सर्वतिथ्योत्तरार्धास्पृष्टे पे अपराह्णे पि तिथ्येकभवात्सर्वस्य कव्यं
यदा तु दिनद्वये काकव्याप्तिर्न व्याप्तिश्चेत्तदा यदि तिथिवृद्धिः साम्यं वा तदा परः सा ह

ति ५

॥४८॥

र्द्धे तु साम्ये परेति । खर्वो दर्पः स्याद्धिंसा त्रिविधं निखिलं जगत् । खर्वदर्पौ
परौ पूज्यौ हिंसा स्यात्पूर्वकालिकीति व्यासवचनादित्यर्थः । खर्वः साम्ये
दर्पो वृद्धौ हिंसा क्षयः । यदा दिनद्वये स्वकालव्यापिनी तदा यो यस्य विहि
तः कालः कर्मणस्तदुपक्रमे । विद्यमानो भवेदंगं नोज्झितोपक्रमेणा
च्छित्तिवचनात् । हारीतादिके परे त्वाह अथो नुल्लंघ्य ह्यापराह्णं । वपु
कश्राद्धादिकेष्वपरेति । एकोद्दिष्टादिकर्मसु मध्याह्नव्यापिनी ग्राह्ये
त्याह । एकोद्दिष्टं विधिर्मनुष्ययजनं माध्याह्निकेनो दिकं प्रातर्दैविकं
मासिकं च यजनं पूर्वाह्न एव स्मृतमिति तथा च हारीतः । आमश्राद्ध
तु पूर्वाह्णे एकोद्दिष्टं तु मध्यतः । पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमि
त्तकमिति तथा च देवलः । पूर्वाह्णे दैवकार्याणि मनुष्याणां तु मध्यमे इति
एकोद्दिष्टं तु मनुष्ययजनं वृद्धिश्राद्धे आमश्राद्धे च दिनद्वये कालव्याप्त्य
व्याप्ति समव्याप्तौ पार्वणोक्तन्यायो ग्राह्य इत्याह । एकोद्दिष्टमुख्येषु कर्मसु तिथिः
दैवेन यः पूर्ववदिति । देवकार्ये काल आप्ता व्याप्तौ च परेत्याह दैवे चोदय
कीक्रियासमये यो व्याप्नोति [illegible] तिथिमुहूर्तं त्रिरह्नो वा सा तिथिः

॥४८॥

95

उभयदिनापेक्षयाद्विवचनं

हृष्यकव्यपोः ॥ उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ इति वचनात् । यदि तु एकस्मि
न्नेव दिने कालव्यापिनी तदा कर्मणो यस्य यः कालः सा तत्कालव्यापिनी तिथिः । तया
कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति वचनात् कर्मकालव्यापिनी ग्राह्येत्या
ह । एकैवाखिलकर्मकालयुगसौ ग्राह्या दिवा मापरेति द्वे शुक्ले हे तथा कृष्णे मुग्ना
दीयत्र पो विदुः शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके इत्युक्तेस्त्याह । अथो
मन्वादियुगादिकर्मतिथयः पूर्वाह्णिकास्तु सिते विज्ञेयाः अपराह्णिकाः स्युर्बहुले इति
आचरणानां तु पूर्वाह्णो ह्यपराह्णस्तथापर इति वचनात्पूर्वाह्णापराह्णविभागो युगादिष्विज्ञ्या
ह । पूर्वापराह्णविहद्ध्या भक्त दिनोदरा को निगदिता विज्ञैः । कालव्याप्ता दौ पूर्वो त्तनिर्णय
इत्याह द्वैधे तिथेः पूर्वं च दिति ॥ अथ प्रेतश्राद्धेषु नवश्राद्धकालः । एकोद्दिष्टविधिर्मृत
स्य निधनस्थाने तथा वर्त्मनि स्थाने विश्रमणस्थाने ततः संचयविधेः स्थाने इत्येके
चयं स्यात् । तच्चतुर्थे तृतीये वा दिवसे संचयनदिने इति यावत् । तथा नागरखंडमाह
यज्ञः । त्रीणि संचयने स्यात् एतानि वैश्रवणसांप्रतं । यत्र स्थाने भवेन्मृत्युः स्तत्र श्राद्धं प्रक
ल्पयेत् एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः । ततः संचयनस्थाने तत्र पंचश्राद्धमि
ष्यत इति अथ तनुयाद्यायं चतुर्थे पिवाश्राद्धं पंचमसप्तमाष्टनवदिके रुद्रेषु युग्म
द्विजैरिति । एषु दिवसेषु श्राद्धं युग्मद्विजैः तनुयात् । तथा च कूर्मपुराणे ऽह्ना यौनग
कोनारि प्रथमे भोजयेद्द्विजान् । द्वितीये ह्नि कर्तव्यं क्षुरकर्म सबांधवैः । चतुर्थे

प्रेतश्राद्धकालः ॥

चतुर्थे

॥४८॥

बांधवैः सर्वैरस्थिसंचयनं भवेत् । पूर्वाह्णे विप्रानभ्युंजीत युग्मान् श्रद्धया शुचिन्
पंचमेन वमे चैव तथैवैकादशेऽहनि । युग्मांश्च भोजयेद्विप्रान्नवश्राद्धं यतः द्विदुरिति
अनेन नवश्राद्धमात्रे युग्मब्राह्मणभोजनमुक्तं । तदस्थिप्रत्याख्यायां तथ्यैः सप्तमष्टमदशमा
दि दिवसाः संगृहीताः । तथा च नागरखंडे । नवश्राद्धानि चास्थिसंचयनस्यानि मिथुकां
पंचमे सप्तमे तद्वदष्टमे नवमे दशमे एकादशे चैव नवश्राद्धानि तानि चेति । विप्रादिना
न्येष्ठमस्य यदन्नदन्नादि संजीवनोदयं से चयपवासरे द्विजवरेरिति । द्विजवरैर्ब्राह्म
णैः । तथा च बृहस्पतिः । चतुर्थेऽहनि विप्रेभ्यो देयमन्नादि बांधवैः । गावः सुवर्णव
स्त्रं च प्रेतमुद्दिश्य शक्तितः । यत्किंचिज्जीवनस्यासीद्देयं तस्य यत्नतः इति । चतुर्थेऽहनि सं
चयवासरे तस्य प्रेतस्येत्यर्थः । अत्रादिशब्देन कुमारादेयं पंचनवेशासंख्यादियसे
ष्विति दश एकादशः । ब्रह्मपुराणे । चतुर्थे ब्राह्मणानां तु पंचमेऽहनि भूभुजां । नव
मे वैश्यजातीनां शूद्राणां दशमात्परमिति । अन्येषां संतर्पयेदाशौचात्परतो द्विजा
निति । स्मृतकानां नवश्राद्धमेकोद्दिष्टप्रपंचश्च तदिति ब्रह्मपुराणादिति भावः । इति न
वश्राद्धस्य कालः स्मृतइति स्पष्टं । अथ षोडशश्राद्धकालः ॥ आद्यं रुद्रमितैः श्राद्धानि
त्यनेन । आद्यमासिकं रुद्रसंमितेः एकादशदिने ऊकेसमितेऽह्नि द्वादशदिने वा स्यात् ऊनषे
द्वितीयादिकं मासिकं प्रतिमासं मासादौ अत्यय निश्चिषु मरणादिनेषु स्यात् पक्षे
चये त्रैपक्षिकं सार्धमासे स्यात् । एवं षड्शश्राद्धानि षोडशानवमिश्रकाणि पूर्वो
क्तनवश्राद्धसहितानि षोडशश्राद्धानि नवश्राद्धानि एकोद्दिष्टरीत्याचरेदित्यर्थः

षोडशश्राद्ध कालः ॥

॥४८॥

97

सांग्निकस्य षोडशश्राद्धकालः॥

सपिंडीकरणकालः॥

तथाच व्याघ्रपादः। एकादशे चतुर्थे च मासि मासि च वत्सरं। ब्राह्मपुराणे द्वादशेऽह्नि मासेऽर्ध
षिपक्षे च ततः परं। मासि मासि तु कर्तव्यं यावत्संवत्सरं द्विजैः इति तथा। एकाहेन तु षण्मा
सा यदा स्युरपि वा त्रिभिः। न्यूनाः संवत्सरश्चैव स्यातां षाण्मासिके तदा। यदा एकेनाह्ना
त्रिभिर्वा दिवसैर्न्यूनाः प्रथमाः षण्मासाः स्युः संवत्सरश्चैकेन न्यूनो भवति तदा न्यूनषाण्मासिकं न्यू
नाब्दिके स्यातामित्यर्थः। एतन्न्यूनमासिकस्याप्युपलक्षणं। तथा च सपिंडीकरणादर्वा
ग्यानि श्राद्धानि षोडश। एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु। इति। तत्र पैठीन
सिः। मासिकानि स्वकीयेषु दिवसेषु द्वादशेऽपि वा इति। एतेन न्यूनदिने मासे द्वादशे कार्यमित्युक्तं
भवति॥ सांग्निकस्य षोडशश्राद्धकालमाह। अग्निमतो भवति दहनादेकादशाहादिषु स्व
स्वेषु पक्षितिः परं मन्तव्या वेवेति तत्रैव कात्यायनः। श्राद्धमग्निमतः कार्यं दाहादेकादशेऽह
हनि। ध्रुवाणि तु प्रकुर्वीत प्रमीताहनि सर्वदा इति। त्रैपक्षिकं तु ध्रुवाणि। असमर्थ
विषयमाह अथ शक्तिर्न चेत्स्यात्पड्भिरुतुभिर्द्विर्नरः। त्रिभिर्मासैरेकं वा द्वादशेऽह्नि
द्वादशमासिकानीति। षड्भिरृतुभिर्द्वादशमासिकानि अत्र तु प्रति द्वे द्वे मासिके इ
त्यर्थः। तथाच हारीतः। मृतस्य श्राद्धं मासि मासि पर्वणि वोर्ध्वं तु प्रति द्वादशाहान्वा सो
ऽप्येकाहद्वादशे विवाह इति। तत्र इदं सपिंडनोपचिकस्मृतमिति। सपिंडीकरणादर्वाक्कु
श्राद्धानि षोडशेति वचनादिति भावः॥७॥ अथ सपिंडीकरणकालः॥ स्यादसपिंडीमन
ग्निकस्यैकमनग्नेः पूर्णवर्षे इति तथाच भविष्यपुराणे। सपिंडीकरणं कुर्याद्यजमानो

॥५०॥

स्पनग्गमात्। अनाहिताग्नेः प्रेतस्य पूर्णेब्दे अरनलभ्रमेति। ततः प्राप्य अभ्युदयागमे इति। यो
लमौंजीविवाहादौ तु तेनो वर्षागमेपि कार्यमित्यर्थः। तथा च नागरखंडे ततः सपिंडीकरण
वत्सरादूर्ध्वतः स्मृतं। वृद्धिर्वा गामिनी चेत्स्यात्तदर्वागपि कारयेदिति। वर्षपर्यन्ति सपिंडी
करणासमर्थे प्रत्याहत्यं चन पदुश्चेन्मासि षष्ठे गते सार्धे मास एव वासरे वितनुया
देकादशे द्वादशे वेति। तथा च गोभिलः। पूर्णे संवत्सरे षण्मासे त्रिपक्षे वा। यदहः
द्विरापद्यते वेति। चतुर्थे त्वान्तर्ते। सपिंडीकरणं चार्धे संपूर्णे अभ्युदये तथा। त्रिप
दृश्येवाथ केचिच्चिन्तयन्ति एकादशेऽहनीति। व्याघ्रः। अनंत्या कुलधर्माणां पुंसां
चैवापुंसः क्षयात्। अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते इति। न्यूनाश्ची
स पिंडने त्वपि पुत्रो स्यात् षोडशश्राद्धांकृतिः। श्राद्धानामिति पुराणान्तर्यं कृतिः। अनुमासि
कच दृश्यं संस्मृतः। षोडशश्राद्धं विना सपिंडनं न स्यादित्याह। श्राद्धानि षोडशादत्वा न
कुर्याच्च सपिंडनमिति। अनुमासिकानि तुच्यरेत्तान्येव स्यात्पिंडनः। पश्चाद्द्वादशेति
तथा च लौगाक्षिः। यस्य संवत्सरादर्वाक् सपिंडीकरणं भवेत्। मासिकं चोदकुंभं च
देयं तस्यापि वत्सरमिति। अथ साग्निकस्य सपिंडीकरणकालः। साग्निकस्य तु नि
रग्निकस्येव सपिंडीकृतिः। आरभ्यान्यप वासरात् तत्र तनुपात्य श्राद्धे इति चेन्नि

साग्निकः सपिंडीकरणकालः।

॥५०॥

(91)

राग्निः साग्निकस्य सपिंडीकृतिं तनुयाचारात्स्य परस्य च येतनुपादिति योजनातथा
चलमुहारीतः। अनग्निकोपदावीरभये कुर्याद्धाग गृह्णीप्रेतश्चेदग्निमांश्चेत्स्याद्धि
पक्षेतु सपिंडनमिति। अथाग्निमान्कर्तानग्निः सपिंडनं मृतदिनात्कुर्याद्दिनेकाद
शेऽहिति तत्राचोक्तं। यजमानोग्निमान्राज्ञोन्येन त्वानग्निमान्भवेत् द्वादशाहे भ
वेत्कार्यं सपिंडीकरणं सुतैरिति। पित्रोः प्रेतकृतिं विधाय सकलमेकादशाहे द्विजः
कस्मिंश्चिद्दिधीनथाहि पुरतः सापिंड्यमिन्दुक्षयान्तरे तत्र चाह कात्यायनः। ए
कादशाहं निर्वर्त्य पूर्वेद्युर्दर्शश्चेत्या विधिवत्कुर्वीताग्निमापन्नेपि मातापित्रोः सपिंड
नामिति। एकादशेऽहिनेवेदमावास्या स्याच्चेदा साग्निकेन तस्यामेव सपिंडनं कार्य
मित्याह आशौचो नारदश्चैवासरदृं साग्निश्चरेद्दे निराधाय जाबालिः। सपिंडीकरण
कुर्यात्सूर्येन्दुग्रहेग्निमान्सुतः। परतोदशरात्रस्य पूर्णे होतु तथा परइति दशरात्र
ग्रहणं आशौचस्योपन्नस्य पार्थे। हारीतः। यात्तुराज्ञो नमावास्या मृताहाद्दशामी
भवेत्। सपिंडीकरणं न स्यात् कुर्यादेव सुतोग्निमानिति। अयं दर्शश्राद्धकृतोद्य
मंत्रमुदितं शूद्रस्य च द्वादशाहेऽहीति तत्पश्च विष्णुः। मंत्रवर्ज्यं च शूद्राणां द्वादशेऽहनि निर्व

क्षयाहनिर्णयः॥

र्णितमिति। एतदमावास्याश्राद्धकारिशूद्रविषयमिति वृद्धाः॥ इति कालनिर्णय
कारा:॥ अथ क्षयाहनिर्णयः॥ यस्मिन्मासि तिथौ च यत्र निधनं तन्मासपक्षस्थिता
प्रत्यब्दं मृतकालिकी तिथिरसौ तस्य क्षयाहः स्मृतः॥ यत्र यस्मिन्नधिमासे निधनं
प्रत्यब्दं तन्मासादौ स्थिता या मृतिकालिकी तिथिः असौ तस्य क्षयाहः स्मृता॥
तथा च व्यासस्मरणं। मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रियतेऽहनि। प्रत्यब्दं तु
तथाभूतं क्षयाहं तस्य तं विदुरिति। चतुर्विधमासेष्वत्र कोऽसौ मास इत्याकांक्षाया ॥५५॥
माह। यज्ञादौ खलु सावनो निगदितः सौरो विवाहादिके स्याच्चान्द्रस्त्वरी
तुले स्यमृतने यद्दिने च मासः स्मृत इति। तथा च व्यासः॥ विवाहादौ स्मृतः सौरो
यज्ञादौ सावनः स्मृतः। आब्दिके पितृकार्ये च मासश्चान्द्रमसः स्मृत इति। अधि
मासे विपक्षिके सौरं मानं प्रकल्पयेत्। स्वर्यादिवत्सरस्य श्राद्धविडोऽकादि
क्षुत्यादिवाक्यात्। अत्रायं श्राद्धं स्यान्मलिम्लुचे मृतस्य मलिम्लुचे भावे स्याच्छुद्धे
चरेदिति पूर्वमेवोक्तत्वात्। स्यादधिमासके यदि स्वो पक्षः शुक्लो वार्षिके तत्र
त्रो विद्धान्तस्य मलमासस्य पूर्वं तु कुर्यादिति। श्राद्धं श्राद्धं वार्षिकमाचरेन्नियमतः
पिञ्जो। पिञ्जव्याख्याने त्वाश्रो स्याल्लघु हीनयोः स्त्रीनरैर्यांस्याधिकारागतं। आलज

हीनयोः पितृव्यज्येष्ठभ्रात्रोः। तथाच ब्रह्मपुराणे। प्रतिसंवत्सरं कार्यमाभ्यां पित्रोर्मृतेऽहनि पि-
तृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि॥ इति। एतच्चाधिकारमात्रोपलक्षणमिति कालनिर्ण-
योक्तेः स्वादितरेषां स्वाधिकारागतमित्युक्तेः। नोपुत्रस्य पितानुजस्य न चरेद्ध्राद्धं वरीयास्त-
ध्या। सापिंड्यं च विनानयोः पितृभ्रातृस्नेहाच्चरेन्नानि मासि चेति। तथोक्तेऽनपुत्रस्य पितादध्या-
नानुजस्याग्रजस्तथा। अपि स्नेहेन कुर्यान्नां सपिंडीकरणं विनेति बौधायनः। पित्रा श्राद्धं न क-
र्तव्यं पुत्राणां च कदाचन। भ्राता चायेव न कर्तव्यं भ्रातृणां तु कनीयसां। अपि स्नेहेन कुर्वीतां
सपिंडीकरणं विनेति तथा। पितृव्यभ्रातृमातृणां ज्येष्ठानां पार्वणं भवेत्। एकोद्दिष्टं कनि-
ष्ठानां दंपत्योः पार्वणं स्मृतः। एतन्मोहात् प्रायेण एकोद्दिष्टविधानं॥ अथ क्षयाहे द्वैधे निर्णी-
यः। यत्राह हान्यधिकापराह्णमयनेसास्यान्निथिः पार्वणेऽद्वितिअधिकापराह्णे स्वहा। पराह्णे
यते गच्छति या अपराह्णव्यापिनी या पार्वणे सा तिथिर्भवेदित्यादिवचनादिति भा-
वः। सा मध्ये न ह्यपराह्ण भागमुगसोऽप्यह्नो तिथेरुच्चरा। यास्यामह्नि सस्समत्वपो स्तपुरतइति स्मा-
र्मेनद्वयोरपराह्णयोर्भिगं फमन्त्रकीति अपराह्णभागयुक्ता सोतिथिः निर्णेयः चन्द्रोहत्तरा होमसम-
मलयोः पुरतः पूर्वे पूर्वः। तथाच क्षयाहविषयाकृत्ये बौधायनः अपराह्णद्वयव्यापिन्यतीतस्य स्मृ-
पदा तिथिः। क्षयपूर्वेऽतु कर्तव्याह्नो कार्यात्तथोत्तरेति अतीतस्य मृतेऽस्य। तिथिसाम्येऽतु स्मृ-
तुः अपराह्णव्यापिनी चेत्स्यान्नतदा हस्यतु या तिथिः। पूर्वस्यानिर्वपेत् पिंडमित्यांगिरसभाषि-
त इति। अथो नापराह्णे स्पृशेच्चाध्यायिविलम्बश्चैनेनापराह्णगता सा सर्वदा ग्राह्येति। तथा च दिन
द्वयेऽप्यपराह्णव्याप्त्यभावे मनुः। नव्याह्नव्यापिनी चेत्स्यान्नताहस्यतु या तिथिः। पूर्वविद्धैव कर्तव्या
त्रिमुहूर्ताऽपि याश्वैवतत्थादिनद्वयेऽप्यपराह्णव्यापिनी चेद्या। अह्नव्यापिनी चेत्स्यादित्यादि वच-
नाम्नूवेवेति भावः। श्राद्धं पार्वणमारभ्य नकुर्वात् पेयकास्यां वालइति॥

अपराह्णद्वैधे
निर्णयः॥

(१२)

~~द्रुकाले घ्वन्यतम एवं अल्पोपराह्णो बुधैः स्मृतः ।~~

तथा च मत्स्यपुराणे । मध्याह्ने सर्वदा यस्मान्मन्दो भवति भास्करः । तस्मादनन्तफलदस्तत्रारंभो विशिष्यत इति । तथा च विष्णुः ॥ यावत्स्याद्विघ्नितः कालः कर्मणस्तदुपक्रमे । विघ्नमानो भवेद्दैनोज्झितोपक्रमे न चेति । अथ सग्रह्ये त्र्यान्यतमः स्मृतेषु समयेष्वल्पोऽपराह्णो बुधैरिति । अत्र कुतपाह्नो स्मृतेषु समयेषूक्तेषु पूर्वाह्णादिकालप्रकरणे परह्णादिकालप्रकरणे वक्ष्यमाणो ज्ञेयः । काले घ्वन्यतम एकः अल्पोपराह्णो बुधैर्गृह्यते । तथा च कालनिर्णयप्रकाराः । अत्रापराह्णः स्वल्पकालः पूर्वाह्णादिकालप्रकरणे वक्ष्यमाणोऽपराह्णे घ्वन्यतमो वा इति यद्वति ॥ ॥ अथ क्षयाहाज्ञाने निर्णयः । प्रश्ने मासि मृते तिथावविदिते तन्मासगैकादशी स्यात्तत्प्रसृता क्षयाहविषये कृष्णा तु पक्षान्तरे । नो ग्राह्या स्मृतौ तिथिर्विदितु सक्षयदिनं तन्मासि वा संभवाभावे स्वीकार्या तिथिः सितेति । मृते ज्ञाने पक्षास्तु तौ तु कृष्णा अनं तन्मासि वा सैव एकादशी ग्राह्या वा । अथ वा तन्मासिदुस्थं क्षयादिनं अभावा स्याद्ग्राह्या । संभवाभावे कृष्णैकादश्याश्चलाभे सिता शुक्लाईशा तिथिरेकादशी ग्राह्येत्यर्थः । तथा च बृहस्पतिः । न ज्ञायते मृताहश्चेत्प्रमीते प्रोषिते सति । मासश्चेत्प्रतिविज्ञातस्तदृश्यो ऽस्यामृताहनीति । मृताहनियतकर्त्तव्यं तदिति शेषः । अस्मिन्नेव विषये मरीचिः ॥ श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि । एकादश्यां तु कर्त्तव्यं कृष्णपक्षे विशेषतः । अत्र विशेषत इति । कृष्णपक्षस्य प्राशस्त्याभिधानं । तेन शुक्लपक्षोप्यनुज्ञात इति गम्यते । तत्र च शुक्लकृष्णैकादश्यो विकल्पे प्राप्ते एवं व्यवस्था । मासे प्रश्ने विज्ञाते तिथिमात्रस्यापरिज्ञाने तत्पक्षगैकादश्यां श्राद्धं कार्यं । विज्ञातपक्षत्यागे कारणाभावात् ।

क्षयाहाज्ञाने निर्णयः ॥ ॥५२॥

॥५२॥

(७३

१५४३७

मतवानाश्रुतेः ग्यासोतोपूर्वोक्तक्रमेणाचेति। वचनाच्च पूर्वोक्तप्रकारस्योक्तत्वात् सचनं
मृतवार्ता श्रुतेः ग्याह्यो तो पूर्वोक्तक्रमेणाद्यि ति। अथ न चेज्जन्मासोनमतास्तु तिथिर्वा विदि
ज्ञापते मृताहस्येत्यादिनोक्तो ग्राह्य इति भावः। पूर्वोक्तप्रकारेण दिनमेव विज्ञानीत्या द्वितीया दि
तामार्गादिमासस्थितः प्रोक्तस्तादृवस इति। तत्र मानकाले मृति श्रवण
वः। अथ मास दिनयोरज्ञानस्फुरति चेद्दर्शमावास्या स्यात् मार्गादिगता। तत्र मानकाले मृतिश्रवण
कालेयव चमान योर्मासदिन योरस्फुरतिश्चेत्तदा मार्गादिगतामावास्यायां ग्राह्यमित्यर्थः। प्रवास
नेज्ञानातिमासेवापि कथं चनेत्यक्तत्वात्। कथं चन मरणप्रस्थान श्रवणरूपेणकेनाप्युपक्र
मेणेन न ज्ञानातीत्यर्थः। अथ यस्य निधनं वान्यच्चेत् ज्ञायते ऊर्ध्वं पंचदशाहात् प्रतिकृतिं सं
स्कृत्य तत्स्याय रेदं त्यकर्म स एव दाह दिवसः स्यादाह्निके कर्मणीति। यस्य प्रोषितस्य निधनं
नं मरणं अन्य जीवनं वा। तथा च जातूकर्ण्यः। पितरि प्रोषिते यस्य न वार्ता नैव चागतिः। ऊर्ध्वं
पंचदशाद्वर्षात् कृत्वा तत्प्रतिरूपकं। कुर्यात्तस्य च संस्कारं यथोक्तविधिना ततः। तदादी
न्येव सर्वाणि प्रेतकर्माणि कारयेदिति। पितर्यन्येन प्रोषित मात्रस्योपलक्षणं॥ छ॥ अ
थ मघाश्राद्धनिर्णयः॥ पित्र्यं पुच्चवनाम पिंडमुदितं श्राद्धं मघाख्यमिति। तथा च वायुपुराणे॥
मघासु कुर्वन् श्राद्धानि सर्वान् कामानवाप्नुयात्। प्रत्यक्षमर्थिताः स्तेन भवंतीतरसत्के
तीतयाय संक्रान्त्यामुपवासेन पारणेन च भारत। मघायां पिंडदानेन ज्येष्ठपुत्री विनश्यति॥
भविष्यपुराणवचनात् पुत्रिणां पिंडवर्जनमिति भावः। ऊर्ध्वं वर्षाच्च नदिति। एतन्मघाश्राद्ध
तथा वायुपुराणे। पितापितामहश्चैव तथैव प्रपितामहः। जातं पुत्रं निरीक्ष्यैव वर्षासु च मघा
सुचेति। अथो विभक्तसहजाः कुर्युर्भिन्नं पृथग्यदि इति। सहजाः सोदराः। रोकुनाद्य पिफलमधु
मांसेन खड्गेन पयसा पायसेन वा। एवं नोदास्य निश्राद्धं तत्र पायोक्तं। विभक्ता वा विभक्ता वा
र्युः श्राद्धं सदैव हि मघासु यत नोन्यायाधिकारः एव थ इति॥ अथाद्रीयादिभिन्निः श्राद्ध
कालः॥

त्र

मघाश्राद्ध
नि

॥५३॥

॥५३॥

ना दिति आ

(105)

पक्षस्यापरिज्ञाने कृष्णैकादश्यां। तन्मासाभावे तु शुक्लैकादश्यामपीति। कालनिर्णयकारै
र्निर्णीतं। अथ न मृतो मासोपि हृद्गतः स्यात्तदा मार्गो माघो नभस्यो वा तन्मभेवेदिति। नभस्यो भाद्रः
अनुक्तेस मुख्यत्वार्थेनोपि नाद्रिनं समुद्दीयते। न जानाति दिनं यस्तु मासं वाप्य मृतस्यापि
ति। अरुणेन पृष्टे आदित्यवाक्यं। मृताहं यो न जानाति मासं वापि च नो तथा। तेन कार्यममा
वास्यां श्राद्धं सांवत्सरं नृपेति। सामान्योक्तेः। तत्रैव दिनज्ञाने मासाज्ञाने भाद्रपदमार्गमा
घयोः। अतस्तन्मासवर्जिन्यमावास्या ग्राह्येति भावः। तथा प्रभासखंडे। मृताहं यो न
जानाति मासं वापि कथंचन। तेन कार्यममावास्यां श्राद्धं माघेथ मार्गगे। दिनज्ञाने तु ति
थ्यः स्मृता सा मार्गादिगतेति। तिथ्यज्ञाने तु सा तिथिः मार्गादिगता। मार्गमाघभाद्रगता
स्मृता मुनिवरैरित्यर्थः। तथाच भविष्यपुराणे। दिनमेव तु जानाति मासं नैव तु यो नरः। मा
र्गशीर्षेथ वा माघे भाद्रे वापि समाचरेदिति। अथ मासदिवसौ प्रास्थानिकाव स्मृतौ।
ग्राह्यौ प्रोषितसंस्थितस्येति। प्रोषितसंस्थितस्य प्रस्थितमृतस्य मरणमासदिवसौ
अस्मृतौ अज्ञातौ तदा प्रास्थानिकौ प्रस्थानसंबंधिनौ ग्राह्यौ। तथाच बृहस्पतिः। दि
नमासौ न विज्ञातौ मरणस्य यदा पुनः। प्रस्थानदिनमासौ तु ग्राह्यौ पूर्वोक्तया दिशेति।
यदि तु ज्ञातौ न तौ कीर्तितौ तत्क्षयश्रुतिकालिकाविति। यदि तौ प्रस्थानिकौ मास
दिवसौ न ज्ञातौ तदा तत्क्षयश्रुतिकालिकौ प्रोषितमृत्युश्रवणकालिकौ कीर्तितौ उक्तौ।
मृतवार्ताश्रुतौ ग्राह्यौ तौ पूर्वोक्तक्रमेणेति। अथ दिनयातस्य वार्ताश्रुतः। न ज्ञातं चेद्दिनं यस्य
सिगदिनस्य मासिदर्शो इति। प्रस्थानदिनमासौ तु ग्राह्यौ पूर्वोक्तयादिशेति वचनात् तथा य

105

आशौचोपहतौ तु मासिकविधेराशौचकालात्ययः । तस्योत्तरमासितद्दिनमाद्यास्याः सितैकादश्यां शुक्ला
वा प्रकल्पनीयान्नद्दिने निमासिकविधेराशौचोपहतौ सत्यां तु अत्र मासिकविधौ आशौचानकाला
त्ययः शस्तः श्रेष्ठः । अथवोत्तरमासितद्दिनादिः अनुकल्पतो गौणत्वेन गृहीतं इत्यर्थः । मुख्यानंतरका
लस्य मुख्यकालप्रत्यासन्नत्वात् श्रेष्ठत्वं इतरेषां च कालानां प्रत्यासन्नत्वाभावे गौणत्वमिति भावः ।
तथा च ऋष्यशृंगः । दैवं तु पितृणां श्राद्धं आशौचं जायते यदा आशौचे तु व्यतिक्रांते तेभ्यः श्राद्धं विधी
यते । तथा याज्ञि: । तद्दहस्थे प्रदुष्येत केन चिद्दूतकादिना सूतकानां तरं कुर्यात् पुनस्तद्दहरेव वा निः ।
पुनरुत्तरमासितस्मिन्नेव दिन इत्यर्थः । तथा च षट्त्रिंशन्मते आद्ये तु मासिके प्राप्ते अंतरा मृतसूतके
चेदं तिशुद्धं तद्दैवापि विशेषतः इतिस्मरी विरपि । श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेहनि एका
दश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः । कृष्णपक्षे विशेषत इत्यनेन शुक्लपक्षोप्यनुज्ञातो भवति ।
अथो वार्षिकस्योत्तरमासेन तिथि मंतरेण समयास्त्वाशौच विशेषमाशौचमिति तद्दहस्थे प्रदुष्ये
त्यादिवचनं तु मासिकश्राद्धविषये तत्र मासस्पष्टकालाभावे पि पक्षतिथिमात्रस्पष्टस्यापि प्रा
प्तत्वात् पूर्ववाक्यो क्ताः कालाः गदितानि भावः । आशौचेन रचितेति मृतयति थौ दशादिके
पूर्वाह्णिकं कुर्यादिति । आदित्यात् शुक्लकृष्णे कादश्यो ग्राह्ये । तथा च व्यासः । श्राद्धविघ्ने समु
त्पन्ने अंतरा मृतसूतके । अमावास्यां प्रकुर्वीत श्राद्धं वेकेम मनीषिणः इति । पैकादशी विधाय
कं पूर्वोक्तवचनं तु उत्तरमासितत्तिथौ मुख्ये काले भवेन्मासिकमिति । तद्दहस्थे प्रदुष्येत्यादिवाक्यं
मासिकमिलुक्त चोदशादिके काले मासिकं भवेदिति भावः । श्राद्धविप्र निमंत्रणा सरमुत्तरं आ
शौचकादिशौ मृतौ जन्मादिचेत्कृते न्यग्रहे नाशौचदोषो भवेदिति । अन्यगृहे गोदान भवनव्यति
रिक्ता भवन जाते मृतौ जन्मनि च कृते सात्रे आशौचदोषो न भवेदित्यर्थः । तथा च ब्रह्मपुरा
णे । निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि निमंत्रणाद्धि विप्रस्य स्वाध्यायादिरतस्य ।

यदा तु पत्नीव भर्त्तुः श्राद्धकर्त्री श्राद्धदिने रजस्वला भवति तदा पंचमेहनि तच्छ्राद्धं कुर्यात् तदाह श्लोककौ
गोतमः अपुत्रा तु यदा भार्या संप्राप्ते भर्त्तुराब्दिके रजस्वला भवेत्तानु कुर्याच्च पंचमेहनि । तथाच वै
श्लोके समनुप्राप्ते यस्य भार्या रजस्वला पंचमेहनि तच्छ्राद्धं न कुर्याच्चेन्न नाहनि च्चेइति । यस्य
भार्या रजस्वला तस्य श्राद्धं भार्यायकिंचीम्न ताहेरजोथु क्षार ज्ञोदजीना पंचमेहनि कुर्यादित्यर्थः
भार्या रजस्वला तस्य श्राद्धं प्रकुर्वीत भार्यापत्यरजस्वलेति । तथा
यत्तु अपत्न प्रोषिते ग्र्य प्रवासे पुत्रजन्मनि आमश्राद्धं द्विजैः कार्यं शूद्रः कुर्यात्सदैव हीति । कात्याय
अर्चविदेशकालानां विध्रुवे समुपस्थिते आमश्राद्धं द्विजैः कार्यं कुर्यादित्युक्तं तन्न ताहये
नत्वाच्यपादवचमात्स्यापुत्रादिकर्त्तारश्च भार्यापरजस्वलायां आमश्राद्धं कुर्यादित्युक्तं
इदं प्रथमपुत्रे अथः द्वितीयपक्षे बोध्यं ॥ ७१४
तिरिक्तश्राद्धविषयं ॥ तदाह लोगाक्षिः । इदं प्रथमपुत्रे अथः द्वितीयपक्षे बोध्यं ... विशेषस्य वस्य माताद्याद्दे तदन्त
देहपितृषु तिष्ठन्सुतानां शौचं विधते कृचिदिति । दारजन्मवने जाते विशेषस्य वस्य सूतकेमृतकेतथा
गृहविषयमिति भावः । अज्ञाते पितृदिति । तथाच तत्रैव । अपि दारगृहीतंश्च सूतकेमृतकेतथा । अशुद्ध
गृहविषयमिति भावः । अज्ञाते पिनच्चेदिति । तथाच तत्रैव अपि दाररगृही तं श्च सूतके मृतके तथा
अविज्ञातेन दोषास्याद्श्राद्धादिषु कथंचनेति । दारतरभोक्तृश्चेति दोषोलस्य ज्ञातीति दोषः । अथ पु
नः अघुनेकस्मिन्दिनश्येचनन्दशुकिं ग्राह्यपरोदकाचमनतः शुद्धिर्द्विजानांमतेति । तथा ब्रह्मपुराणे भा
जनाद्युसमुक्ते विधेर्जविपद्यते । पदार्थाच्चदाद्दिष्टदोषः न्यत्कासमाहिताः आयश्च परका
येनजलेन शुध्यपोद्विजाइति । गृहइति दोषः । मध्ये यज्ञविवाहयोरशुचितायेष्वेभमन्नंपरेद्वैयेराङ्कर
यमितितथाच ब्रह्मपुराणे । विवाहयज्ञयोर्मध्ये सूतकेसति । जोतराशे भमन्नं परेदैयेराक्षे
भोज्यश्चनस्यत्रोदिपि दोषः इति दोषः दानविधौ तु नास्त्यशुचितासंकल्पितास्यापरतः । सद्य
स्पर्शेनसिः । अन्नआदौ संकल्पितस्य तु दानविधौ अशुचितानास्ति । अतश्च क्रतुः । पूर्वसं
कल्पितं द्रव्यं दीयमानं न दुष्यतीति । भार्ये त्रौसति पंचमेत्रदिवसे स्याद्वार्षिकं मासिकं पक्षा
न्नेरित्ति तथाच स्मृतौ नरः ॥ मृतेहनि तु संप्राप्ते यस्य भार्या रजस्वला । श्राद्धं तदानकर्त्तव्यं धर्त्त
व्यं पंचमेहनीति । यत्तु अपत्नीकप्रवासी च यस्य भार्या रजस्वला ॥ सिद्धान्नेन कुर्वीत आमं न

स्यादि ध्यायत इति उशनो वाक्यं । तत्र श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितं । अमावास्यादि
नियतं मासस्य वत्सराद्यहरिति अनेन हारितवचनेन समानविषयं । अतो मासिकं च सांवत्सरि
कं च पक्षान्ते नैव कुर्यादित्यभिप्रायो तं प्रकान्तेरिति । बहुभार्यकस्याधिकृते पत्न्यन्तरे इति श्रुति । कुर्यात्त
द्वितयस्य मृतस्य दिवसे इति अत एव तन्मते कालनिर्णयकृता । अधिकारिणि भार्यान्तरमुक्तेऽप्यधिकारा
न पातान्मृतस्य दिवस एव कर्त्तव्यमिति । तद्देशे तु भार्यान्तरे विप्रामश्राद्धविधिं प्रवासिविधुराद्याश्चरे
कद्विजा इति । अपत्नीकः प्रवासी चेत्यादिवाक्यं दयादिति भावः । नोक्तस्तत्र भये दिने पितृन्तु
देशैव पित्र्यं विधिं भार्यार्त्त्वादिषु पुत्रजन्मनि नित्यश्राद्धं द्विजासंभव इति । तत्र आमश्राद्धं अत एव
देशैव पित्र्यं विधिं भार्यार्त्त्वादिषु प्रवासे पुत्रजन्मनि हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वलेति आ
व्यासः पुत्र्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि पञ्चदशकमिति । अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व
पूर्वाह्णादिकालविभागः । त्रिधा ह्यहर्मुहूर्त्तैः स्थो दिवसस्य मध्यसमयः । प्रोक्तोऽत्र मध्याह्नके
देहि । त्र्यंशस्त्वखण्डान्तः पूर्वापराह्णाः त्रिधे ह्नौ ॥
इति । दिवसस्य पूर्वापराह्णावित्यर्धे अह्नो भागौ स्तः । अत्रास्मिन्पक्षे दिवसस्य मध्यसमयो
मध्याह्नकः प्रोक्त इत्यन्वयः । तथा च स्कन्दपुराणे । आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः इति । अह्नस्त्रेधा
आवर्त्तनं दिनमध्यं ... क्रमतः स्युस्त्रयोऽवयवाः स्कं । पूर्वमध्यापराह्णाख्याः स्युस्त्रयोऽवयवाः स्कं । अत एव श्रुतिः ।
दिवसस्य भागत्रयपक्षे क्रमतः पूर्वमध्यापराह्णाः पितृणामिति । भागचतुष्टये प्रहरकः । पूर्वा
पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितृणामिति । सायाह्नस्तुरीयायां म
ह्नसंज्ञोऽर्धक करं मध्याह्नस्त्वपराह्णक भगदितो यावत् स्याद् ध्वंक्रमात् । इत्यन्येनैवाह्निकं कार्यमिति ज्ञायामेनन कश्चित् इति अन्योन पक्षान्ते नैव । अरी
मुख्यवस्यामितदारे बुविदेशस्थोऽप्यनग्निक अन्यो नैवाह्निकं कार्यमिति ज्ञायामेनन । आमश्राद्धं प्रकुर्वीत न स्कुर्यान्महानिति । अत्र तु प्रथमप
विरपि अनाग्निकः प्रवासी यस्य भार्या रजस्वला आमश्राद्धं प्रअधीतन नस्कुर्यान्महानिति । अत्र त्वं प्रथमप

पौ प्रथम मुहूर्ते बोध्यं ॥

(187)

कइति। दिवसस्यैकचरणं संबंधः। अर्धं प्रकृप्रहरार्धं चक। तदर्धं यामार्धं। तथा यामो भिलः॥
पूर्वाह्णे प्रथमे सार्धं मध्याह्नं प्रहरं तथा। आन्त्यो पादपराह्णः सायाह्नश्च ततः परः इति। प्रात
स्त्वाथ संगवो मध्याह्नोऽथ पराह्णको निगदितः सायाह्नकः पंचधा। भागो वा दिवसस्येति तथा
च प्रभासखंडे मुहूर्तत्रितयं प्रातस्तावानेव तु संगवः। मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णो
ऽपि तादृशः। सायाह्नस्त्रिमुहूर्तोऽपि सर्वकर्मबहिष्कृत इति। यस्तु समयः प्रोक्तः शुभप्रश्नेषु
यस्मात्सोऽत्र मतः शुभः। प्रकथितस्तत्कालकर्मसु इति। अत्रास्मिन्प्रकरणे प्रोक्तो शुभप्रश्नेषु मध्ये
यः समयः पूर्वाह्णादिकालः। यस्मात्पूर्वादिकालादणुः सूक्ष्मः कालः। स तत्कालकर्मसु ततः ॥५५॥
स्थूलात्कालात् शुभः प्रकथितः उत्कर्षेणोक्त इत्यर्थः। स्थूलपक्षप्रतिपादकशा
स्त्रस्य बाधानार्थ्यपरिहाराय सूक्ष्मपक्षप्रतिपादकं शास्त्रं प्राक्तन्यपरमणीकार्य ॥५५॥
मिति भावः॥७॥ अथ कुतुपः॥ गोविप्रातिथिपूजासु खड्गपात्रं कतिनादर्भा मुहूर्तोऽष्टमः। दौहि

कुतुपः

त्रो रजतं चैव त्रिरुद्दिता नेपालजः कंबलः। छागो वा कुतुपा इमेति। इमे कुतुपाः उदिताः
इत्यन्वयः। तदुक्तं कालिपुराणे। ब्राह्मणः कंबलो गावो सूर्यो ह्यतिथयोपि वा। तिलादर्भा

का

श्च मध्याह्नो नवैते कुतुपास्मृता इति। तथा प्रभासखंडे। अह्नो मुहूर्ता विज्ञेया दश पंच च
सर्वदा। तत्राष्टमो मुहूर्तो यः स कालः कुतुपः स्मृतः। तथा। मध्याह्नः खड्गपात्रं च तथा नेपा
लकंबलः। रूप्यं दर्भा स्तिला गावो दौहित्रश्चाष्टमः स्मृतः। पापं कुत्सितमित्याहुः तस्य सं
तापकारिणः। अष्टावेते यतस्तस्मात्कुतुपा इति विश्रुता इति। कौपीनं कैनातु तथान्यः

कालकंबलइत्युक्तं ॥७॥ अथ श्राद्धविशेषेणापराह्णादिविनियोगः ॥ अथ विहिताग्ने
चैश्चदेवात्परं दर्शे पिंडनिरुक्ति मन्वन्ति कृतं श्राद्धं जिताग्नाहितस्याह्नौ चरमेइति ॥ वि
हिताग्नेः साग्निकस्य। आहितस्य विप्रऋस्य। तथा वल्गोगाल्लिः ॥ पक्षांतं कर्म निर्वर्त्य वै
श्वदेवं च साग्निकः। पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुध इति अन्वाहार्यकं दर्शश्राद्धं
तथाच मनुः ॥ पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते। वासरस्य तृतीयेंशे नातिसं
ध्यासमीपत इति। द्विधाहः कुतुपं त्यांशादिके तु स्मृतं। निराग्निकादीनां तु कुतुपव्यापि
नी दर्शे अमावास्यानिर्णये दर्शितं। शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः। कृष्ण
पक्षे पराह्णे तु रौहिणं तु न लंघयेदिति मार्कंडेयवचनस्यायमर्थः। शुक्लपक्षे पूर्वाह्णो नग्नि
ते कुतुपे पूर्वार्धे कृष्णपक्षे पराह्णो नग्ने तु कुतुपोत्तरार्धे श्राद्धं कुर्यादिति। एतदग्निमत्यो
र्थं कुतुपांत्यांशादिके इति। अथाग्निकद्विजजनः कुर्वीत पूर्वाह्णिकं इति। आमश्राद्धं तु पू
र्वाह्णे एकोद्दिष्टं तु मध्यतः पार्वणं चापराह्णिकं तु प्रातर्वृद्धिनिमित्तकमिति हारीतवचनेन
पूर्वाह्णे यदामश्राद्धं विहितं तद्द्विजविषयमिति भावः। शूद्रस्य कुतुपोत्तरार्धकामुख्ये
काले चरदामिकमिति। मध्याह्नात्परतोपस्कृत्सकालः कुतुपः स्मृतः। आमश्राद्धं न तत्रैव
पितृणां दत्तमक्षय्यमिति ज्ञातातपवचनं शूद्रविषयं। आमनोदेशकालानां विद्धवे समु
परस्थिते। आमश्राद्धं द्विजो कार्यं शूद्रेण तु सदैव हीति। शूद्रस्य नित्यत्वेनामश्राद्धं सार्धीते
ग्र पार्वणं शूद्रेण क्रियमाणं पार्वणकाल एव कार्यं। द्विजस्य तु नैमित्तिकमामश्राद्धमिति।
आमश्राद्धं तु पूर्वाह्णे इति विधिः पार्वणकालं बाधत इति भावः। तथायोपसंहृतं। कालनिर्णयपद्धतौ ॥

तस्माच्छ्राद्धं आमश्राद्धं कुतुपोत्तरार्धप्रभृति प्रयत्नेन पराह्णे। द्विजामन्त्र्याद्धं तुष्ट्यर्थमिदमिति।
कोद्दिष्टमुपक्रमेत कुर्यात् नेत्र प्रातःस्नानादी मुख्यमिति। आमश्राद्धं तु पूर्वाह्ण इत्यत्र एव वाक्यात्।
पुत्रो। त्पत्तिनिमित्तकं तु पुरतो नान्दीश्राद्धवत्पापमेवेत्। अत एव विष्णुधर्मोत्तरे। अशौचे त्वेनाभ्यां
कर्त्तव्यं श्राद्धं वै पुत्रजन्मनीति। आशौचान्तरसंभवे पितृश्चितौ नाकर्तुं स्वाहानिश्चयापि प्रोक्तं
स्यादिति। एतत्पुत्रनिमित्तं श्राद्धं त्वाह प्रजापतिः। स्नातको तु समुत्पन्ने पुत्रजन्मयदा भवे
त् कर्तुं स्यात्कालिकी शुद्धिः पूर्वाशौचेन शुद्ध्यतीति। तथा च व्यासः। पुत्रजन्मनि मात्राया
श्चार्वयं दृत्तमस्य पत्नीति। अतिक्रमेत्तु परत स्यादशौचनः कीर्तितमिति। तथा यो न्ये जन्मा
नोनंतरं कार्यं जातकर्म यथाविधि। दैवादतीतं काले चेद्यतीते सूतके भवेत्। अथ श्राद्ध

॥५८॥

श्राद्ध निषेधकालः॥

निषेधकालः॥ तत्र संध्यायां श्राद्धस्य निषिद्धत्वात्संध्याकालज्ञानमाह। संध्या प्रागस्त ॥५८॥
यात्मुहूर्तयुगलं सूर्यस्य यावत्स्तासरं नाडीनां त्रयमिति। यदाह याज्ञवल्क्यः। उदयास्तमनात्
नीसंध्यामुहूर्तद्वयमुच्यते। सायं संध्या त्रिघटिकास्त्वस्तादुपरि भास्वत इति। अत्र
रात्रिषु न श्राद्धं न संध्यान्तिक इति। अत्र संध्यायाम् अंतिके समीपे। तथा च मनुः।
रात्रौ तपोरात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा। संध्ययोरुभयोर्वापि सूर्ये चैव
चिरोदिते॥ त्रिसंध्यासमीपकालोपलक्षणं। तदुक्तं स्कंदपुराणे। उपसंध्यं न आवीत पितृ
यज्ञं कथंचन स कालआसुरः प्रोक्तः श्राद्धं तत्र विवर्जयेदिति। नाशौचेषु परे वरदानं त्यक्तमन्त्रे
कुर्यादिति। अत एव पैठीनसः॥ दान प्रतिग्रहहोमं स्वाध्यायं पितृकर्म च प्रेतकर्माणि
यावदशौचे विनिवर्तयेदिति। अत्राशौचे निर्गोन्यस्मिन्स्तत्र तु स्मादि। सायं काले तत्पूर्वं
आहारे पक्वं समापद्य श्राशौचे सत्यां तद्ध्राद्धं निर्गोन्यस्मिन्। तिथ्यतिरिक्ते सर्ये काले तत्कुर्यादित्यर्थः॥
तभाय व्याख्यपाद॥ विधिहरं ग्रहणोपेतः॥

११२

सम्यक्पात्रनियोजकः। रात्रेरन्यत्र कुर्वाणः श्रेयः प्राप्नोत्यनुत्तममिति। न तु कश्चिदयं प्रोक्तो निषेधो
ग्रहे। तदाह विष्णुः। संध्यारात्र्योर्न कर्तव्यं श्राद्धं खलु विचक्षणैः। तयोरपि च कर्तव्यं यदि स्याद्राहुदर्श
नं। अथापिंडदानानि निषिद्धकालः। याम्यर्क्षे बुधसंगमे पितृयज्ञः पिंडैर्विहीन इति। बुधसंगमे॥
श्रोत्रियागमे। अत एव। ब्रह्मपुराणे। यदा च श्रोत्रियोऽभ्येति गृहं वेदविदग्निचित्। तेनैकेन तु कर्तव्यं
श्राद्धं विषुववच्च तदिति। विषुववदित्ययने नापिंडत्वमुक्तं। तथा बृहत्पराशरः। युगादिषु मघायां च वि
षुवेऽयने तथा। भरणीषु च कुर्वीत पिंडनिर्वपणं नहीति। तथा पातादौ च पुरोदित इति। पुरोदिते अयना
दिश्राद्धकालप्रकरणोक्तपातादौ तथापिंडहीनमित्यर्थः। तच्च तत्रैवोक्तमिति भावः। अथ नववरे उद्वाहनो
द्वादश। मासान्पिंडविधिं तथोपनयनान्यब्द सपिंडोऽयानि। तदुक्तं ज्योतिःपराशरे। विवाहे विहिते मासान्
त्यजेयुर्द्वादशैव हि। सापिंडाः पिंडनिर्वापं सोऽनुबंधे षडेव हीति। अथोद्वाहादावपि पिंडदानमुदितं पित्रोः क्षया
हेऽखिलैः। सापिंड्ये समहालये खलु गयाश्राद्धे इति। तथा चोक्तं। महालये गयाश्राद्धे मातापित्रोः क्षयाहनि।
यस्य कस्यापि मर्त्यस्य सापिंडीकरणे तथा। कृतोद्वाहोऽपि कुर्वीत पिंडनिर्वपणं सदेति। स्वधावाचनं लुप्ये
सिंडविलोपने इति। तथा च वृद्धशातातपः। पिंडनिर्वापरहितं यत्तु श्राद्धं विधीयते। स्वधावाचनलोपोऽत्र वि
धिरस्कृ न लिप्यते इति। अत्र स्वधावाचनलोपोक्तविधिस्तु न लुप्यत इत्यन्वयः। अथ प्रेतक्रियासु निषि
द्धकालः। अथ न दिनं त्रोध्वं शावादीपने। आशौचस्य दिनेषु चेत्समतिक्रान्ते दाहो यथासंभवं त्रोध्वं स्याद
शुचित्वतः परमहः त्रोध्वं भवेत्सर्वथा। यद्यन्यरमुत्तरायणगतः पक्षोऽसितः शस्यते सर्वत्रैव दिनक्ष

॥५७॥

यंपरिहरेदिति। शावादीपने प्रत्यक्षशरीरदाहे। अस्थिचित्रतः। आशौचात्। सर्वत्रप्रतिकृतदाह्यदुष्टेका
लत्रयंतत्र दिनक्षयंपरिहरेत्। तथाचगार्ग्यः। प्रत्यक्षशवसंस्कारे दिनं नैव विशोधयेत्। आशौचमध्ये
क्रियते पुनः संस्कारकर्म चेत्। शोधनीयं दिनं तत्र यथासंभवमेव तु। आशौचविनिवृत्तौ तु पुनः संस्क्रि
यते मृतः। संशोध्यैव दिनं ग्राह्यं मृध्वंसं वत्सराद्यदि। प्रेतकार्याणि कुर्वीत श्रेष्ठं तत्रोत्तरायणं। कृष्णपक्ष
स्य तत्रापि वर्जयेत्तु दिनक्षयं। इति। नंदासंभूतांस्मरं। वारो सौरि भृगूच्च पात परिघो भद्रां तथा वैधृतिं ज
ह्यात्त्यातिकराश्वि पुष्यहरिभान्यश्रेतकृत्ये शुभमिति। प्रेतकृत्ये। नंदादि जह्यात्। भं तु स्वातिकराश्विपु
ष्यहरितोभान्यज्जह्यादित्यन्वयः। मरीचिः। नंदायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे। तत्र श्राद्धं न कुर्वीत
गृही पुत्रधनक्षयात्। त्रिपुष्करं त्रिपादनक्षत्रं। श्राद्धशब्देनात्र प्रेतक्रियाविवक्षितेति कालनिर्णयकाराः।
महाभारते। नक्षत्रेण न कुर्वीत यस्मिन्जातो भवेन्नरः। न प्रोष्ठपदयोः कार्यं तथाग्नेये च भारत। दारुणेषु
च सर्वेषु प्रत्यरेषु विवर्जयेत्। जन्मश्राद्धकर्तुः। प्रोष्ठपदयोः भाद्रपदयोः। दारुणान्याश्लेषाज्येष्ठामूला
नि। जन्मभात्संचमं चतुर्दशं षष्ठं त्रयोविंशं च प्रत्यरं। ज्योतिःपराशरः। साधारणे ध्रुवोग्रे मैत्रे च नशस्यते
मनुष्याणां। प्रेतक्रिया कथंचित् त्रिपुष्करे यमलधिष्ण्ये च। साधारणे। कृत्तिकाविशाखे। ध्रुवाण्युत्तरात्रयं
रोहिणी च। उग्राणि पूर्वात्रयं भरणीमघा च। मैत्राणि। मृगचित्रानुराधारेवत्यश्च। यमलधिष्ण्यं धनिष्ठाव
राहपुराणे। चतुर्थीमष्टमीं चैव द्वादशीं च विवर्जयेत्। प्रेतकृत्ये व्यतीपाते वैधृते परिघे तथा करणे

॥५७॥

(113)

पिणिष्ट संज्ञे च श्राद्धे श्वरादिने पि च । अयोदश्यां विशेषेण जन्मतारा त्रयेन च । जन्मतारा त्रयं
कृत्यं चिन भवत्रं दृश्च मे प्रकोनविंशा चेति । तथा कात्यायनः । भरण्यार्द्रा तथाश्लेषा मूलं त्रिचरणा
नि च । प्रेत कृत्ये तु दुष्टानि धनिष्ठा पंचकं पंचकमिति । विशाखा कृत्तिका फल्गुनी द्विपदभाषा
ढानुराधा पुनर्वसुचाश्विनी सति संभवे बुधजन्मैर्वर्ज्यं किं पदोषत इति । तथा च कात्यायनः । फ
ल्गुनी द्वितयं रोहिण्यनुराधा पुनर्वसुः । द्वे आषाढे विशाखा च भानि द्विचरणानि च । एता
नि किंचिद्दुष्टानि वर्ज्यानि संभवे इति दर्शे शुक्लचतुर्दशी गाङ्गिम त्रिचरणान्येकादशी न
न्दागं भूतं निषेत मत्यजेदिति । तथा च मरीचिः । एकादश्यां तु नंदायां सिनीवाल्यां च
गो चिन्ने न भस्य स्पर्शचतुर्दश्यां कृत्तिका सु त्रिपुष्करे । अत्र श्राद्धं न कुर्वीत गृही पुत्र धनक्ष
या दिति । स्यजनितं तस्मात्रयोविंशार्कदिने मन्वाशुगतुल्यं न्य शुक्ल दान्ये कोन
विंशोत्तरे ति । दिने मन्वाशुगतुल्यानि जन्म श्राद्धत्राम चतुर्दश्यां च मन स आति
जन्म तारा त्रय शाद्धेन प्रवृद्ध राज्ञो न च पूर्वं वचनो नियाल्लोक र्थः । तुर्यकादशी
रात्रिगोष्टमगतोहे योत्र कार्ये श्राद्धे इति । चतुर्थी ष्टमी ति वासहपुराणोक्तो इत्यर्थः ।
नंदादर्शे निषिद्धतामृत पञ्चावेकादशाहादिके इति । तथाय गोभिलः । नंदायां शुक्रवारे च
चतुर्दश्यां त्रिजन्मसु एकादशाहप्रभृति तिने कोद्दिष्टं निषिद्धमिति । अथ मन्वादियुगा
दि संक्रमदिने दर्शेनि शोध्यं दिनमिति । तथा च व्याघ्रः । मन्वादिसंक्रान्तिदर्शे प्रेत
क्रियायदि दैवाद्यापतितात् तत्रनन्नं श्राद्धं शोधनमिति । एकस्मिन् दिने बहु च क्रमोपप
भवे काले विदध्यात् क्रमात् तंत्रेण श्रपणं विधाय पृथक् श्राद्धानि स्वक्रमादिति । एक
स्मिन्काले द्विबहूनामुत्क्रमो मरणं यदि भवेत्तदा तंत्रेण श्रपणं विधाय स्वक्रमात्पृथ

115

एककाले गतानां बहूनामथवाद्भमोः

कः श्राद्धानि विदध्यादिसन्च्यपः। तथाच भृगुः पृथक् पूर्वकस्य मतेस्यादद्वितीयस्य ततः पुनः। तद्व

तंत्रेण श्रमणं कृत्वा कुर्यादाद्यं पृथक् पृथक् ... अथ प्रतिनिमित्तं श्राद्धभेदः। सापि सौत्तरका

पस्य ततः कुर्यात्सनीपाते पृथक् पृथक् इति। अन्यत्र पायरेद्युगपच्चा निमित्तागमइति।

लिकानि युगमन्वादि सपाहादि पूर्वान्यत्र पायरेद्युगपच्चा निमित्तागमइति निमित्तस ग्रहणं श्राद्धनिमित्तानां

अन्यत्र पाकैकत्वेन अयुगपच्चापि निमित्तागमइति निमित्तस्य ... अनुष्ठानं स्यादेव निमि

युगादिकालानां भेदात् श्राद्धभेद इत्यर्थः। अथ कालैक्येन तंत्रानुष्ठानं स्यादित्याह। तंत्रेण सङ्कल्प

त्वा कालयुगपद्भाव स्वैदेकाक्रियानुष्ठानात्सकलस्य सिद्धिराह दृनात तंत्रेण सङ्कल्प्य

नइति सङ्कोनिनिमित्तकमभावास्यानिमित्तकर्तव्यतीपात निमित्तकं चैत्ये ... श्राद्धानां सिद्धि

र्हानित्तंत्रेणापकरिष्ये इति सङ्कल्प्यः। एकश्राद्धानुष्ठानात्सर्वेषां श्राद्धानां सिद्धि

रित्यर्थः। अत्रैव हेतुमाह। एकस्व्हेकानि मित्तमेकदिवसे श्राद्धं न श्रावर्त्तयेदिति। अथ वैश्वदेवादि

न थायकहारीतः। नैक श्राद्धद्वयं कुर्यात्समानेऽहनि कुत्रचिदिति। अथ वैश्वदेवादि

कालः। भिन्नाह्ने न तु वैश्वदेविकमनु श्राद्धं चरेत्साग्निकः। पश्चाद्भुतमखादिनिज्ञ

तमखाभूतपञ्चः। वैश्वदेविकमन्नं वैश्वदेवार्थं नरमित्यर्थः। तत्र तावत्साग्निकेन श्रा

द्धादौ वैश्वदेवः। कार्य इत्युक्तं लौगाक्षिणा पश्चात्कर्म निर्वर्त्य वैश्वदेवं च साग्निकः। पिंड

यज्ञं ततः कुर्यात्तोन्वाहार्यकं बुध इति पश्चात्तमन्वाधानं अन्वाहार्यकं दर्शश्राद्धं स्या

कृत्वोत्वेषु प्रयुक्तः। पितृश्राद्धं निर्वप्य पाकं वैश्वदेवार्थं निर्वपेत् वैश्वदेवं नपि स्पर्शं दर्शश्राद्धार्थं पक्वमन्नं दर्शश्राद्ध

रवैश्वदेविकमिति वैश्वदेवार्थपक्वमन्नं वैश्वदेवतं नापि स्पर्शेद दर्शश्राद्धार्थं निजश्राद्धव्यतिरिक्तानि सा ... मनु

वैश्वदेवार्थं न भवति दर्शश्राद्धेन दर्शश्राद्धे ति कर्तव्यताबोधिनि नित्यश्राद्धस्य वैश्व

वैश्वदेवार्थं न भवति दर्शश्राद्धे तु ... तो। नित्यश्राद्धस्य वैश्व

॥५८॥

॥५८॥

वैश्वदेव काल॥

३

वस्य च एकः पाकः । तथा चोक्तं कालनिर्णयकारैः अन्वहमिष्टीयमानानां देवपितृभूतमनुष्योपयज्ञा
नां यज्ञानामेकपाकस्तु निश्चयादिति । भूतयज्ञादिकं श्राद्धानंतरं कार्यमित्युक्तं ब्रह्माण्डे । वैश्वदेवा
हुतीरग्नावर्वाग्ब्राह्मणभोजनात् ॥ पितृश्राद्धमकृत्वा तु वैश्वं जुहुयात् भूतयज्ञादि श्राद्धं कृत्वा तु त
त्स्मृतमिति भावः ॥ एवं साग्निकस्य श्राद्धात्पूर्वं वैश्वदेवस्य विहितत्वात् । पितृश्राद्धमकृत्वा वैश्वदे
वं करोति यः । अकृतं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति इत्यादि निषेधवाक्यानि निरग्निकविषया
णीति भवति तस्य पृथक्पाकेन वैश्वदेवकालद्वयविकल्पमाह । अनग्निकजनस्याग्नौकृते वा निरं
स्वस्वकृते विकरस्य चान्ते ततस्साकान्तरेणाचरेत् ॥ दैवाख्यं मखमं ततः पितृयज्ञोऽस्य भूतयज्ञ इ
ति । अनग्निकजनस्य अग्नौकृते रग्नौकरणादुत्तरं वा ऊत अथवा विकरस्य स्वस्वकृते श्वअंत
र्मध्ये देवाख्यमखमाचरेत् । तथा च वैश्वदेवाहुतीरग्नावित्यनेन प्रथमः काल उक्तः । तथा चर्
वाग्ब्राह्मणभोजनादित्यनेन अग्नौकरणानंतरं वैश्वदेवाहुतीर्जुहुयादिति उक्तमिति निबं
धकारैर्व्याख्यातत्वात् । तथा च भविष्यत्पुराणे द्वितीयः काल उक्तः । पितॄन्संतर्प्य विधिवद्बलिं
दद्याद्विधानतः । वैश्वदेवं ततः कुर्यात्पश्चाद्ब्राह्मणवाचनमिति । बलिशब्दस्तत्रैव व्याख्या
तः । ये अग्निदग्धा मंत्रेण भूमौ यं निक्षिपेद्बुधः । ज्ञानीहितं बलिं वीर श्राद्धकर्मणि सर्वदे
ति । अनेन विकिरानंतरं स्वस्तिवाचनात्पूर्वं वैश्वदेवः कार्य इत्युक्तं भवति । तस्माकांत
रेण श्राद्धपाकादन्येन पाकेन पृथक्पाकं विधाय कवाक्ये साग्निकानग्निकविशेषवि
रहादित्यर्थः ॥ अत्र भूतयज्ञकालः पूर्वोक्त एव साह अनंतर इत्यादिना तसिः सप्तम्यर्थः

स्येत्यर्थः इयं। तथा च पैठीनसिः ५

पितृयज्ञे श्राद्धस्यांततः अंते भूतयज्ञः स्यात्। तस्यैव श्राद्धान्नेन कालांतरमाह। अथवा श्राद्धान्नेन
तदंते एव सकलं स्याद्वैश्वदेवादिकमिति। निरग्निकः पितृपाकं समुद्धृत्य वैश्वदेवं करोतीयं॥
आलुरंतद्धवेच्छ्राद्धं पितॄणां नोपतिष्ठति। श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं ततः कुर्याद्भिक्षां
ततो दद्याद्धंतकारादिकं तथेति। श्राद्धात्पूर्वं पितृपाकात्समुद्धृतेनान्नेन वैश्वदेवे क्रियमाः
देवं कुर्यादित्यर्थः। आशौचमध्ये वैश्वदेवादेरभावान्न श्राद्धपाके कान्नेकथं केवनाः स्थिर
न्नस्य श्राद्धांतेऽश्याः देयं वा विधानात्। तथा परिशिष्टे। संप्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथै
वच। अग्रतो वैश्वदेवः स्यात्पश्चादेकादशे हनीति श्राद्धांते वैश्वदेवविधानात्कथकः
केन श्राद्धांते कार्य इत्याह। कुर्याच्छ्राद्धमनग्निरग्निसहितो ये कादशाहादिकं शिष्टा
नं द्विजसान्महामखकृतिः स्यादंतेतोन्यांधस इति। द्विजसाद्विजाधीनां महामखकृतिः
पंचमहायज्ञाः॥ अंततः श्राद्धांते अन्यांधसाः श्राद्धान्नादन्येनान्नेन। अथ नित्यश्राद्धे क
नः। नित्यश्राद्धमपीहता मनुपृथक्पाकेन तेनैव वा यद्यस्याखिलदेवताः प्रथमतः
श्राद्धांतरेना चिंताः इति अनुश्राद्धास्याश्राद्धांतरं नित्यश्राद्धमपि इहितां उच्छेत्कुर्या
दिति यावत्। यदि यस्य नित्यश्राद्धस्य अखिलदेवताः। श्राद्धांतरे अचिंतानस्यः

॥५९॥

॥५९॥

117

तथा च चमत्कारखंडे। नित्यश्राद्धं न कुर्वीत प्रसंगाद्यत्र सिध्यति। श्राद्धान्तरे कृते न्यत्र नि
त्यत्वात्तन्न हापयेदिति। अत्र पाकविकल्पमाह पृथक्पाकेन तेनैव वेति। अत एव मार्कंडे
यः। ततो नित्यक्रियां कुर्याद्भोजयेद्वा तथातिथीन्। ततस्तदन्नं भुंजीत सह भृत्यादिभि
र्नर इति। ततः तेन श्राद्धशेषेण अन्नसाध्यां नित्यक्रियां नित्यश्राद्धमपि कुर्यादिति पा
केप्युक्तं। तथा नित्यश्राद्धमधिकृत्य तेनैवोक्तं पृथक्पाकेन नैसकमिति। अतो वि
कल्प इत्यर्थः॥ इति श्राद्धकालः। विवरणे श्राद्धकालनिर्णयः॥ ॥५॥ अथ प्रतिपत्प्र
भृति पुण्यकतिथयः॥ अथ पुण्या प्रतिपत्। चैत्रोर्जेषशुक्लपक्षतिरसौ पुण्या इ
ति। ऊर्जः कार्त्तिकः। इष आश्विनः। पक्षतिः प्रतिपत्। तथा च भविष्यपुराणे। तथानां प्र
वरा यस्माद्ब्रह्मणा समुदाहृता। प्रतिपादिता यदा सृष्टं प्रतिपत्तेन चोच्यते। तिस्रो ह्ये
ताः पराः प्रोक्तास्तिथयः कुरुनंदन। कार्त्तिकाश्वयुजे मासि चैत्रे मासि च भारतेति। अ
थ पुण्या द्वितीया॥ द्वितीया सिता स्याच्चैत्राश्विनयोः शुभेति। देवीपुराणे। चैत्रे दमनकं
पूजां प्रक्रम्य उमां शिवं हुताशं च द्वितीयायां प्रपूजयेत्। हविष्यमन्नं नैवेद्यं देयं गं
धार्चनं तथेति। तथा स्कांदे। आश्विने मासि वै पुण्या द्वितीया शुक्लपक्षजा। दानं प्रदत्त
मेतस्यामनंतफलमुच्यते। अथ पुण्या तृतीया। अथ गदिता शुक्ला तृतीया शुभा।
स्नानादौ मधुराधमाद्रकृतपोमासस्थितेति। राधो वैशाखः। तपा माघः। तथा

॥६०॥

चैत्रं प्रकृत्य देवीपुराणे ॥ तृतीयायां यजेद् देवीं शंकरेण समन्विताम् । सुगंधपुष्पदीपैश्च
दमनेन सुमालिनेति । तथा पाद्मे । वैशाखमासे पुण्या तु तृतीया शुक्लपक्षजा । अनंतपु
ण्यफलदा स्नानदानादिकर्मस्विति । तथा भविष्योत्तरे । गुडपूपाश्च दातव्या भासि भा
द्रपदे तथा । तृतीयायां पापसंघनाशनाय तत्प्रये । माघेमासि तृतीयायां गुडस्य ल
वणस्य च । दानं श्रेयस्करं राजन् स्त्रीणां च पुरुषस्य चेति । अस्याश्चनक्षत्रवारयो-
र्गे प्राशस्त्यमाह धाचिना । रोहिण्या श्रवणेन वा बुधदिने सातिप्रशस्तोदितेति ।
तथा भविष्योत्तरे । श्रवणेन समायुक्ता कुरुक्षेत्रसमा स्मृता । विशेषाद् बुधसंयुक्ता
तृतीयानुविशेषतः । तेन श्रुता वाच्यमाना तृतीया रोहिणीयुता । विशेषाद् बुधसं
युक्ता तदा सा सुमहाफलेति । अथ पुण्यचतुर्थी । चैत्रमधनभस्यमासितचतु
र्थीशस्य तेन्यापिया शुक्ला भौमयुता शुभाथ भरणी सोयन्विता स्मृतमेति । अन्या
सर्वमासास्थितापि शुक्ला भौमादियुता अस्मरा मेलसर्थः । सौर्यन्चिता नरा निवारयुता
तथा चैत्रमधिकृत्य देवीपुराणे । गणेशोकारसूजाल्लड्डुकादिविभावितां । चतुर्थ्यां वि
घ्नानाशाय सर्वकामप्रसिद्धये । तथा च भविष्यत्पुराणे । शिवा शांता सुखा राजन्
चतुर्थी त्रिविधा स्मृता । मासि भाद्रपदे शुक्ला शिवालोकेषु विश्रुता । त-
स्यां स्नानं च दानं च उपवासो जयस्तथा । माघेमासि तथा शुक्ला चतुर्थी तु महापते ।

॥६०॥

२

(११७)

इंयासावां तिदानि संक्रांतिकार्यां स्यादेव हि। मदनरत्ने। चतुर्थ्यां तु वारो भौमस्य वा भवेत्
तदा सा सुखदा ज्ञेया सुखनामेति कीर्तिता। चतुर्थी भरणीयोगे स्नानेश्वरदिनं यदि। तदा=
ऽप्ययमं देवं पूज्यते सर्वकिल्बिषैरिति। अथ पुण्यापंचमी। मार्गे भाद्रे नभस्ते पौषे माघ शुच
यौ कार्त्तिके सितापंचमीति। तथा च स्कांदे। शुक्ला मार्गशिरे पुण्या श्रावणे या च पंचमी। स्ना
नदानैर्बहुफला नागलोकप्रदायिनी। तथा च ब्रह्मांडे। शुक्लायां माघपंचम्यां चैत्रे मा
सि शुभानने। श्री ब्रह्मलोकान्मानुष्यं संप्राप्ता केशवाज्ञया। तस्मात्तां पूजयेत्तत्र यस्मा
ल्लक्ष्मीर्न मुंचति। भविष्यत्पुराणे। तथा भाद्रे मासि पंचम्यां श्रद्धयान्वितः। समालेख्य
रो नागा कृष्णवर्णादिवर्णकैः। पूजयेद्गंधपुष्पाद्यैः सर्पिर्गुडपायसैरिति। तस्या एव
श्रेष्ठनरत्वमाह। श्वापेच्च्यत राहरेरसितं गोति। हरेः स्वापे असितगा कृष्णपंचमी श्रे
ष्ठतरा। तथा च भविष्यत्पुराणे। सुप्ते जनार्दने कृष्णपंचम्यां भवनांतथा। पूजयेन्मनसा
देवीं गृहीविटपसंश्रयामिति॥ ॥अथ पुण्याषष्ठी। षष्ठी तु सर्वा शुभा शुक्लेति। तथा
च स्कंदपूजामधिकृत्य ब्रह्मपुराणे। सर्वासु शुक्लषष्ठीषु पूज्यो सौ श्रद्धयान्वितैः। आरो
ग्यकामैर्बलानां पुत्रवृद्धिर्विशेषत इति। अयमधमार्गयोरिति। तथा ब्राह्मे। जातः स्कं
दः स्कंदषष्ठ्यां तु शुक्लायां चैत्रनामनास्तदा। पक्ष्य पुण्यच्च सुकं। तथा भविष्यत्पुराणे। या ष
ष्ठी शुक्लपक्षस्य मार्गशीर्षे हरिप्रिया। महाषष्ठीति विख्याता तस्यां जातो हुताशन
इति। उभयगता पूज्ये इति

तथा भविष्यत्पुराणे। षष्ठ्यां फलाशनो राजन् विशेषात्कार्तिके तथा। कृष्णपक्षे शुनियतो ब्रह्मचा-
री समाहितः रविनभस्येव रेति। तथा चतन्त्रे वा येवं भाद्रपदे मासि षष्ठी स्याद्भरतर्षभ। इवं पु-
ण्या पापहरा शुभा शांतातिवान्नृयेति। अथ पुण्या सप्तमी। अथोशास्त्रे हस्तितान भस्य सहयो-
गविति तिथिसप्तमीति। सहा मार्गशीर्षः। तथा च भविष्ये। मासि भाद्रपदे शुक्ला सप्तमी या गणा-
धिप। अपराजितेति विख्याता महापातकनाशनीति। या तु मार्गशिरे मासि शुक्लपक्षे

॥६१॥

तु सप्तमी। नंदा सा कथिता वीर सर्वानंदकरी शुभा। माघस्य शुक्लपक्षे तु सप्तमी या त्रिलोच-
ना जयंती नाम सा प्रोक्ता पुण्या पापहरा स्मृतेति। शुक्लायाश्चिरवो शुभेति। अन्या सर्वमा-
सस्था। तथा भविष्योत्तरे॥ विजया सा महापुण्या शुक्ला या सप्तमी रवौ इति। अतिफलदा
सा रेवती संयुतेति। सा आदित्यवारफला। तथा च स्कांदे। रेवती यत्र सप्तम्यामादित्यदिव-
से भवेत्। तद्दानं शतसहस्रमिति प्राह दिवाकर इति। शतसाहस्रमिसनेन फलाधिक्यमु-
क्तं अथ एवाचार्यवर्यै रति पलतित्र फकं। एवमेव तत्र तत्र भावगम्यापि पदानि प्रयुक्तानीति
ज्ञेयं। सर्पाश्लेषा मघा करैर्वरुणभेनाकस्यवासंक्रमेयोपेताधिकपुण्यदेति। आश्लेषा रोहि-
णी मघा हस्तत्रीन ताराः संज्ञैर्नक्षत्रैः सूर्यसंक्रांता च याउपेता संगता शुक्ला सप्तमी सा अ-
धिकपुण्यदा। तथा च भविष्योत्तरे। नक्षत्रे पंचतारे या सिता सा सप्तमी जया। पंचताराश्मा-
रकायःस्मिन्नक्षत्रेः तानि च पूर्वोक्तानि। तथा च कालनिर्णयकारैर्व्याख्यातं पंचतारं शाक्र-
मिषकूरोहिण्याश्लेषा मघा हस्तश्चेति तथा शुक्लपक्षे तु सप्तम्यां यदा संक्रमते रविः॥

सा

महाजयानदाँस्या सप्तमी भास्करप्रियेति। अथ पुण्याष्टमी। बुधपुनर्वसुयुक्ता शुक्लाष्टमी चै
त्रे मासि सिताग्निया इति। अग्निया श्रेष्ठाः। तथा च विष्णुः। पुनर्वसौ बुधोपेता चैत्रे मासि
सिताष्टमी। प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेत्। अथ बुधयुक्ताम्यान्विताया
सिता। पुष्ये पुण्यतरेति। याज्या। भरणी। पुष्ये मासे। तथा च भविष्ये। पौषे बुधाष्टमी शु
क्ला महारुद्राख्य महाफलेति। तथा ब्रह्माण्डे। पौषे मासि यदा देवि अष्टम्यां यमदैवतं। नक्ष
त्रं जायते पुण्यं यल्लोके रौद्रमुच्यते। यदा नु साम का पुण्या जयंती अष्टमी स्मृतेति। अ
थ माघमासि सिता भीष्माचनेयोदिता। तथा च ब्रह्मपुराणे। माघमासि सिताष्टम्यां स
लिलैर्भीष्म तर्पणं। श्राद्धं च येन राः कुर्युस्ते स्युः संततिभागिन इति। तत्र मंत्रः। वैयाघ्र
पद्य गोत्राय सांकृत्यप्रवराय च। अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे इति। अत्राशुक्लापि
बुधान्वितेति। तथा च महाभारते। आश्विपुत्रसमाक्रान्ता परिपूर्णा सिताष्टमी। तस्यां नियम
कर्त्तारो रक्षः खण्डितसंपदः। आश्विपुत्रो बुधः। अथ पुण्या नवमी। अथ नवमी तत्रास्ता रिवलौ
अखिलो सर्वमासस्थाः सर्वाः। नवम्यां च सदा पूज्या गौरी देवी समाधिना। वरदा सर्व
लोकस्य भविष्यति नरौ संयतिं इ सामान्येन वामनपुराणोक्ते। इषेमध्योऽर्जे वाथ्यतरा
सितेति। तथा च ब्राह्मे। चैत्रे नवम्यां शुक्लायां भद्रकाली महाबला। योगिनीनां तु सर्वासा
माधिपत्ये अभिषेवितेति। तथा देवीपुराणे। आश्विने नवमी शुक्ला तस्यां कोटिगुणं फलमि
ति। तथा शुक्लपक्षे नवम्यां यः कार्त्ति

॥६२॥

कस्य समाहितः। स्नात्वा दद्यान्नमस्कृत्य दक्षिणां लभते फलमिति। अथ शुभा दशमी। अथ द
शमी ज्येष्ठे सिता पुण्यदेति। तथा देवीपुराणे॥ ज्येष्ठस्य शुक्लदशमी संवत्सरमुखी स्मृता।
तस्यां स्नानं प्रकुर्वीत दानं चैव विशेषत इति॥ हस्ते भौमदिने स्मृता दशहरा सैवाधिका।
हस्ते दशहरा स्मृता। सैव हस्तयुक्तैव भौमदिने अधिकेति योजना। तथा ब्रह्मपुराणे। ज्येष्ठे
मासि सिते पक्षे दशमी हस्तसंयुता। हरते दश पापानि तस्माद्दशहरा स्मृतेति। दश पापा
न्याह मनुः। पारुष्यमनृतं चैव पैशून्यं चापि सर्वशः। असंबद्धप्रलापश्च वाङ्मयं स्याच्चतु
र्विधं। अदत्तानामुपादानं हिंसा चैवाविधानतः। परदारोपसेवा च कायिकं त्रिविधं स्मृतं। पर
द्रव्येष्वभिध्यानं मनसानिष्टचिंतनं। वितथाभिनिवेशश्च त्रिविधं कर्म मानसमिति। विष्णु
धर्मोत्तरे। दशम्यां शुक्लपक्षे तु ज्येष्ठे मासि कुजे दिने। गंगावतीर्णा हस्तर्क्षे सर्वपापहरा
स्मृतेति। अस्मिन्योगे गंगा। स्नानमात्रेण सर्वपापहरा स्यादित्यर्थः। अथ पुण्यैकादशी
अथोत्तमा एकादश्यखिलेति। तथा नारदपुराणे। एकादश्यां तु नक्तेन नरः कुर्याद्यथा
विधि। मार्गशीर्षे शुक्लपक्षमारभ्याब्दं विचक्षणः। लब्ध्वा तं धनदश्रेष्ठ कृतं वित्तं प्रयच्छ
तीति। सिता त्वतिफलादित्यर्क्षपुष्यान्वितेति। आदित्यर्क्षं पुनर्वसुः। तथा विष्णुधर्मे।
एकादश्यां शुक्लपक्षे यदृक्षं वै पुनर्वसुः। नाम्ना सा विजया ख्याता तिथीनामुत्तमा
तिथिरिति। तथा। एकादश्यां सिते पक्षे पुष्यर्क्षं मनुसत्तम। तिथौ भवति सा प्रोक्ता
विष्णुना पापनाशिनीति। अथ पुण्या द्वादशी। द्वादश्यपखिला शुभा सितगता द्युगाः
श्रुतिद्वान्विता सोक्तेष्टेति। तथा विष्णुधर्मोत्तरे। द्वादशी पुच यदृक्षं शुक्ला सुच

॥६२॥ ४

(123)

विष्णोः पत्नः। श्रवणेन तु युक्ता स्यात्तत्रापि द्विजसत्तम। विष्णोर्बाहुधयुक्ता स्यात् शुक्लपक्षगता सुवे
ति। अथ भगार्कमायुस्तुरपक्रव्यादश्वैरन्विता क्रमात्। आजपदेन पूषदहनेन्द्वादित्यपुष्यै
र्युता। स्याच्चैत्रादिगता क्रमाच्छुभतरेति। भगः पूर्वा। अर्को हस्तः। वायुः स्वाती। सुरपो ज्ये
ष्ठा। क्रव्यादश्च मूलः। क्रतिः श्रवणः। ॥ आजपदं पूर्वभाद्रपदा। पूषा रेवती। दहनः
कृत्तिका। इन्दु मृगः। आदित्यं पुनर्वसुः। पुष्यः प्रसिद्धः। चैत्रादि द्वादशमासगता द्वादशी
एभिर्नक्षत्रैः क्रमाद्युक्ता शुभतरा। तथा च विष्णुधर्मोत्तरे। मघायुक्ता संयुक्ता चैत्रे द्वादशी
स्यान्महाफला। हस्तयुक्ता तु वैशाखे ज्येष्ठे तु स्वातिसंयुता। ज्येष्ठ्यां तु तथाषाढे मूलो
पेता तु वैष्णवे। वैष्णवे श्रावणमासे। तथा भाद्रपदे मासे श्रावणेन च संयुता। आश्विने द्वादशी पु
ण्या भवत्याजपादसंयुता। कार्तिके रेवतीयुक्ता सौम्ये कृत्तिकया तथा। सौम्ये मार्गशीर्षे। पौषे मृ
गशिरोयुक्ता माघे चादित्यसंयुता। फाल्गुने पुष्यसहिता द्वादशी पावनी परा। नक्षत्रैर्युक्ता स्वेतासु स्ना
नदानमुपोषणमिति। माघे तु कृष्णा श्रवणो मूले वा यदि नास्य नेत्रच विलस्नानादीति। आदिश
ब्दात्तिलोद्वर्तनादि। तथा च विष्णुधर्मे। माघ्यां तु समतीतायां श्रवणेन तु संयुता द्वादशी या
भवेत्कृष्णा प्रोक्ता सा तिलवैष्णवी। वैष्णवी द्वादशी। तथा। मूलर्क्षगे गजिधरे माघमासि प्रजा
यते। एकादश्यां कृष्णपक्षे सोपवासो जितेन्द्रियः। द्वादश्यां बहुलाहारं कृत्वा पापैः प्रमुच्यत
इति। अथारो गुरुः सिंहे मेषगतो रविः करयुता चेत्स्यात्सिता द्वादशी योगेस्मिन्व्यतिपात
के वितनु यापादानादीनि। आरो मंगलः। तथा ज्योतिःशास्त्रे। पंचाननस्थो गुरुभूमिपुत्रौ मेषे

(२५

रविः स्याद्यदि शुक्लपक्षो पात्राभिधाना करणेन यस्यां तिथिर्व्यतीपात इतीह योगः
अस्मीन् गोभूमिहिरण्यवस्त्रदानेन सर्वं परिहाय पापं सुरत्वमिंद्रत्वमनामयत्वं म
र्त्याधिपत्यं लभते मनुष्य इति। पात्राभिधाना तिथि द्वादशी। अथ पुण्यात्रयोदशी।
अथाख्यातिथिः पंचेषोमधुशुक्लगेति। पंचेषोः कामस्यातिथिः त्रयोदशी। तथाच यो
मे चैत्रशुक्लत्रयोदश्यां मदनं चंपकामलकं। कृत्वा संपूजयेल्लेन वीजयेद्व्यजनेन तु। अथ पुण्या
चतुर्दशी। अथ शुभदा भूतेति। भूता चतुर्दशी। तथाच विष्णुः। सर्वाश्चतुर्दशीनदीजले
स्नातो धर्मराजं पूजयित्वा पापेभ्यः पूतो भवतीति। असितादुत्तमेति। तथाच पाद्मे। यां का

॥६३॥

श्चित्सरितं प्राप्य कृष्णपक्षे चतुर्दशी। या पुनर्याति तस्यां तु नियतस्तर्पयेद्यममिति। स्ना
ष्यद्यो कुजयुगिति। तथा देवीपुराणे। तथा कृष्णचतुर्दश्यां भौमाहे पितृतर्पणमिति। म
ध्यावति फलेति। भौमयुक्ता कृष्णचतुर्दशी केवला वा कृष्णचतुर्दशी। चैत्रे अतिफलदेस
र्थः। तथा पुराणे। चैत्रे कृष्णचतुर्दश्यां यस्मात् त्रिवसंनिधौ। गंगायां च विशेषेण नस
प्रेतोऽभिजायते। चैत्रे कृष्णचतुर्दश्यामंगारकदिनं यदि। पित्रा चलं पुनर्नस्यात् गंगायां स्नान
भोजनादिति। ऊर्जे भूतमालाष्टयुगिति। लाष्टं चित्रा। तथा ब्राह्मे। कार्त्तिके भौमवारेण
चित्राकृष्णचतुर्दशी। तस्यामाराधितः स्थाणुर्यच्छेच्छिवपुरं ध्रुवमिति। चैत्रो पारव्य
नभोनभस्य गसिताले ख्या तथा षाढगेति। तथाच स्कांदे। चैत्रे चतुर्दशी शुक्ला आव

॥६३॥

125

णोऽष्टपादयोः। माघस्य कृष्णपक्षे यद्दाने बहुफलप्रदेति। मघस्य कृष्णपक्ष इत्यनेन शिव
रात्रेः कथनेनास्य पूर्वोक्तेति नात्रोक्तेति भावः। तथा च मात्स्ये। आराधिते महादेवे तु ध्वजाकारा
सुय त्रिष्टु। ततः शुक्लचतुर्दश्यां मननं न पूजयेत्स देति। दंधं आराधनं वा सर्वो द्वौ धः सवाश्वि
ने विहितन इति। तथा आह्ने। आषाढमासभूते क्रिशिवं संपूज्य मानवः। सर्वपापविनिर्मुक्तः
सर्वसंपदमाप्नुयादिति। अथ पुण्या पौर्णमासी। वैशाखे कार्तिक पस्तु पुण्यदा स्यात्पौर्णमासीति
तथा विष्णुधर्मोत्तरे। वैशाखा कार्तिकी माघी पूर्णिमा तु महाफलेति। तथा मासर्क्षे सकला
यातिः। चैत्रादि संयोगता सर्वा पूर्णिमा महाफलेत्यर्थः। तथा च विष्णुधर्मोत्तरे। पौर्णिमासी
षु सर्वासु मासर्क्षसहिता सु च। दत्तानामिह दानानां फलं दशगुणं भवेदिति। जिव त्रान्हि
नो स्वेक क्षगले पीति। जीवो बृहस्पतिः॥ अपिनाफलं च समुच्चीयते। तथा च स्कांदे पुराणे।
यस्यां पूर्णेन्दुना योगं याति जीवो महाबलः। पौर्णमासी तु सा ज्ञेया महापूर्वा द्विजोत्तमेति।
अथो वा रोदेवगुरोर्यदेंदु धिषणौ मासर्क्षगौ चेद्विवस्वान् स्यात् संचदन्मे महत्स्य क्षितिहितेति। य
दा देवगुरोर्वरिः इंदुधिषणौ चंद्रबृहस्पती मासर्क्षगौ मासनक्षत्रगौ तस्मात् मासनक्ष
त्रात् संचदशनक्षत्रे रविः एवंभूते योगे पूर्णिमा चेत्स्यात्सा महती उक्ता। तथा च ज्योतिः शा
स्त्रे। मासाख्यर्क्षे चेंदुगुरू तस्मात्संचदशो रविः पूर्णिमा जीववारे तु महती कान्तु सा तिथि
रिति। अथैन्द्रे गुरुश्चंद्रमा ज्येष्ठे कौविधि जोग्रियेति। अथ ज्येष्ठे मासि ऐन्द्रे ज्येष्ठायां गु

॥६४॥

न् श्चंद्रमा सा श्च त्रिथिके रोहिण्यां अर्कः। दौ तेया पूर्णिमा साधिमहती सर्थः। तथा च नंत्रै
व ऐंद्रे गुरुस्त्वा शी चैव प्राजापत्ये रविस्तथा। पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठाति कीर्ति
ति। अग्नियमभज्ञो हि पुबे कार्त्तिकी शस्तेति। तथा च पाद्मे। आग्नेयं च यदा ऋक्षं कार्त्ति
क्यां च भवे क्वचित्। महातीसा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा। यदा याम्यं भवेदृक्ष
न स्यां भवति च क्वचित्। तिथि साधि महापुण्या ऋषिभिः परिकीर्तिता प्राजापत्यं यदा
ऋक्षं तथा तस्यां नराधिप। सा महाकार्त्तिके प्रोक्ता देवानामपि दुर्लभेति। सारविमंद=
जीवदिवसे तीवो तमे ति। सा नक्षत्र फक्ता कार्त्तिकी। तथा च पाद्मे। मंदवारे के गुरौ वापि
वारेषु तेषु च त्रिषु। त्री ज्येतानि च ऋक्षाणि स्वयं प्रोक्तानि ब्रह्मणा॥ अथाश्वमेधिकं स्ना
न स्यात् भवेत् नृपेति। मेषगस्वाकि श्चे तपनः क्रतौ गुरु विधसिंहे समाक्रतमेति। आ
किः शनिः। तथा च ज्यौतिःशास्त्रे। मेषपृष्ठे यदा सौरिः सिंहे च गुरुचंद्रमाः॥ भास्करः श्रव
णिस्थो नु महामाघी तु सा स्मृतेति। अथ पुण्या अमावास्या। पूर्णिमा कुजे सोमजीवसहिते
तिः अमा अमावास्या। तथा च महाभारते। अमा सोमे तथा मे भौ गुरुवारे यदा भवेत्
तत्सर्वपुस्करं वा मसूर्यपर्व शताधिकमिति। मैत्राथ रौद्राशिला दिसजे कपदक्षे वारुण
धनिष्ठा पुष्य राधा स्वा भैः फक्ता ग्रेति अनुराधा पूर्वषाढा आर्द्रा स्वाती पुनर्वसु पू
र्वभाद्रपदा शततारधनिष्ठा पुष्य विशाखा स्वा स्वैर्नक्षत्रै रन्विता श्रेष्ठा। तथा च विष्णुपु
राणे। अमावास्या यदा मैत्र विशाखा स्वाति योगिनी। श्राद्धे पितृगणस्तृप्तिं नदा प्नोत्य

॥६४॥

६

(127)

युगा वार्षिकी। अमावास्ये यदा पुष्ये रौद्रर्क्षे वा पुनर्वसौ। द्वादशाब्दीनदा तृप्तिं प्राप्यां निश्चित रोर्चिता:
मासवाजैकपादर्क्षे पितृणां तृप्तिमिच्छता:। वारुणे चाप्यदैवत्ये देवानामपि दुर्लभेति। वरुण
र्क्षे तु कृष्णभूतरामाद्ये इति। वरुणर्क्षं शतनक्षत्रकं। तथास्योक्तं। माघासिते पंचदशी कदाचि
दुपैति योगं यदि वारुणेन। ऋक्षेण कालः स परः पितॄणां नास्वल्पपुण्यैर्नृप लभ्यते सावि=
ति। अथ कार्यं यथा स्नानं दानमिहेना पूजनमुखं विद्यान्निबंधेषु नदिति। अथ रह आसु पुण्य
तिथिषु स्नानं दानं इत्या पूजनमुखं देवपूजनादि च यथा येन प्रकारेण कार्यं तन्निबंधेषु का
लनिर्णयादिषु विद्यान्विजानीयात्। मुखशब्दादित्यादि ग्राह्यं। संग्रहाधिकारित्वान्नोक्तमि
तिभावः। श्रीदः श्रीभिरिजागणेशभुजगस्कंदार्कदुर्गाक्रिमादंबावासुकि मुन्यजस्मरत्रिशूली=
भोजासनाश्वेश्वरा॥ एते स्युः प्रतिपन्मुखास्तिथिधिपा इति। श्रीदो धनदः। अंबा मातरः। अजो वि=
ष्णुः। अंभोजासनो ब्रह्मा। तथा च पितामहः। प्रतिपद्धनदस्योक्ता द्वितीया तु श्रियः स्मृता॥ तृ
तीया तु भवान्याश्च चतुर्थी तत्सुतस्य च। नागानां पंचमी प्रोक्ता षष्ठी प्रोक्ता गुहस्य चास सप्तमी।
भास्करस्योक्ता दुर्गाया अष्टमी स्मृता। मातृणां नवमी प्रोक्ता दशमी वासुके स्मृता। एका
दशी ऋषीणां तु द्वादशी चक्रधारिणः। त्रयोदशी त्वनंगस्य शिवस्योक्ता चतुर्दशी।
तथा धातुस्तिथीनामुत्तमा स्मृतेति। अमावास्यायाः सर्वसाधारण्यमाह। स्याद्देवपित्र्यर्चने
मावास्या सकलेरीति। सकलदेवपित्र्यर्चने मावास्यास्यादित्यन्वयः। अमावास्या सर्वदेव
पित्र्यकर्मण्य ह्यहदेति॥ ॥ इति श्रीकालः प्रतिपत्प्रभृति पुण्यातिथिनिर्णयः॥ अथ नक्ष
त्रयुक्ततिथिनिर्णयः। अथ माश्च भतिथि अपि पन्नयाकीर्तिता पूर्वेर्द्धे यदि मादिफकू

नक्षत्रयु
क्ततिथि
निर्णयः॥

शुभतरा सर्वोत्तरेऽने क्रियापर्याप्तो यदि सोऽन्वयः शुभकर इति। अथ या तिथिः आद्य-
न्वया नक्षत्रवारादियोगाच्छुभतरा कीर्तिता सा यदि दिवसस्य पूर्वार्द्धे पूर्वभागे आदि
फकृतदा सर्वा शुभतरा भवति। चेद्यथवा उत्तरार्द्धे दिवसस्य उत्तरभागे आदिफकृतदा-
मदि सोऽन्वयः नक्षत्रादियोगः क्रियापर्याप्तः कर्मकालव्यापी तदा शुभतरो नान्यथेत्यर्थः।
तथा च ब्रह्मकैवर्त्ते। पूर्वभागे तिथिर्यस्यां ऋक्षयोगान्विता भवेत्। सा तिथिः सकला
ज्ञेया नान्ते ऋक्षेण संयुता। यावत्सा तिष्ठति ब्रह्मन्स्तावत्कालः प्रशस्यते। दानं पूजा। तद्दा
पूजादिकं सर्वं तस्यां तत्फलदं भवेत् इति। अथाल्याकृति द्वादशी रोहिण्यष्टमिकां पु
नाति सकलामित्यकृष्मादौ इति। आदौ जन्माष्टमीश्रवणद्वादशी निर्णये। अथ युगादयः
अथो जैनिलमीच राधगसितोऽग्निः सोऽग्नियो ब्राह्मयकृत् प्राच्यमासितपर्व वाथ मदनो-
भाद्रे सितेसोमघास्य व्योमीन यफगादय इति। अग्निः तृतीया मदनस्त्रयोदशी। तथा च
भविष्यत्पुराणे। नवम्यां शुक्लपक्षस्य कार्त्तिके निरगकृतं। त्रेता सित तृतीयायां वैशाखे
समपद्यत। दर्शेतु माघमासस्य प्रवृत्तं द्वापरं युगं। कलिः कृष्ण त्रयोदश्यां नभस्ये मासिनि
गतिः। युगादयः स्मृता ह्येते दत्तस्याक्षयकारका इति। ब्रह्मपुराणे। माघे तु पूर्णमास्यां तु-
घोरं कलियुगं तथेति माघमास पौर्णिमायां युगादिर्भवति प्रेत्योक्तं सितपर्व वेति। तथा
त्रेतादौ रोहिणीयुक्ता वैशाखस्य सितानुया। मघाभिः सहितं कृष्णा नभस्ये तु त्रयोदशी
युगादयः स्मृता ह्येते दत्तस्याक्षयकारका इति देवलवचनमपि प्रेत्योक्तं सोऽग्नियो-

॥६५॥

॥६५॥

२८

ग्राह्ययुगीति तथा सौम्यास्वग्राह्य इति वा यदा चांद्रसौरमासैक्यं तदा न विशेषः कश्चित्। य
दा तु चांद्रसौरमासौ भिन्नौ स्तस्तदा यो विशेषस्तमाह अथ भवश्चेत्सौरचांद्रौ पृथक्। ग्राह्या
स्तत्र युगादयो दशहराख्याश्चार्कमासस्थितानां कर्ष इति अथ चेत् यदा सौरचांद्रौ
पृथक् भिन्नौ भवतस्तत्र तदा अर्कमासस्थिता युगादयो ग्राह्याः। तथा च दशहराख्याः अ
नयैवोक्तबाना स्तीत्यर्थः। तथा च ऋष्यशृंगः। दशहरासुनोत्कर्षश्च तुर्ष्वपि युगादिषु
उपाकर्ममहाव्रहष्यो हैर्नदिष्टं वृषादित इति। तथा च कालनिर्णयकारैरपि अन्यमतानि
निरस्योक्तं। वयं तु ब्रूमः। यद्यपि वैशाखादिशब्दः चांद्रमासवचना एवेति निरूपितं प्रागु
दाहृतयुगाद्युत्कर्षनिषेधकवाक्यपर्यालोचनया सकलजनप्रसिद्ध्यानुगुण्यादनु
ष्ठानादृशाख्यसौरमासगत एव युगादिर्ग्राह्य इति। अथ युगानां तद्धरिवंशे कोश कल
नोष्वकस्य प्रसक्रमः। ज्ञेयास्ते क्रमशो युगांतसमया इति। हरिः सिंहः उक्षा वृषभः।
तथा च ब्रह्मांडपुराणे। सूर्यस्य सिंहसंक्रांत्या मंतं कृतयुगस्य तु। अथ वृश्चिकसंक्रां
त्या मंतस्त्रेतायुगस्य तु। ज्ञेयस्तु वृषसंक्रांत्या द्वापरांतस्तु संख्य[illegible]या। तथा च कुंभ
संक्रांत्या मंतः कलियुगस्य तु इति। यद्वा युगांते रवेः संक्रांतौ दिनभं च पौष्णमिति यद्वा
रवेः संक्रांतौ दिननक्षत्रं रेवती सापि युगांत इत्यर्थः। तथा चादित्यपुराणे। दिनर्क्षं रेवती
यत्र गमनं चैव राशिषु। युगांत दिवसं विद्धि तत्र दानमनंतकं इति। अयनं तु दक्षिणं तु
लामेषकौ। सप्तम्यां ग्रहणेपि वा यदि भवेत्सोप्यो युगांत इति। उदगयनं। मकरसंक्रा

॥२कृ॥
नं

तिः। तथा च तत्रैव। ग्रहोपरागे विषुवे सौम्ये वा भिहिरोपदि। सप्तमी शुक्लकृष्णायां यु

गांत दिवसं विदुरिति। स्मृतं दानाद्यत्र सहस्रगुणितं तद्युगादिष्वपीति। अत्र युगां

तेषु तद्वत्। तथा युगादिष्वपि दानादि सहस्रगुणितं भवेदिति स्मृतं। तथा च मनुः। सहस्र

गुणितं दानं भवेद्यत्तेयुगादिषु। कर्म श्राद्धादिकं चैव तथा मन्वन्तरादिष्विति। अथ नाना

युगधर्माः। ध्यानज्ञानतयांस्यपेकृतयुगे ज्ञानं तु लिंगार्चनं त्रेतायां यजनं मखैर्वा भ

जनाध्यानादि तु द्वापरे। तिष्ये दानदयादमेश्वरकथासंकीर्तनादि स्मृतमिति। अथ ये

तं आचरेत्। तिष्यः कलिः। यजनं पदं त्रेतायामन्वेति। तथा च शिवपुराणे। ध्यानं परं कृ

तयुगे त्रेतायां लिंगपूजनं। द्वापरे ध्यापनं तिष्ये महादेवस्य कीर्तनं। तथा विष्णुधर्मोत्त

रे। ज्ञानं परं कृतयुगे त्रेतायां च तपः परं। द्वापरे च तथा यज्ञः प्रतिष्ठा च कलौ युगे। तथा बृ

हस्पतिः। तपोधर्मः कृतयुगे ज्ञानं त्रेतायुगे स्थितं। द्वापरे चाध्वरः प्रोक्तस्तिष्ये दा

नं दयादम इत्यादि। ब्रह्माकजित्रिनाश्चतुर्युगेषु राज्ञेयाः क्रमात्पूजने इति। अजः श्री

कृष्णः। तथा च स्कान्दे। ब्रह्मा कृतयुगे देवः त्रेतायां भगवान् रविः। द्वापरे भगवान्विष्णुः क

लौ देवो महेश्वर इति। अजो ब्रह्मा पितामहाभिध विरिंचकमलासनाख्यो ब्रज इति।

अर्कजो ब्रह्मादि जिष्णुर्मूर्तिजिश्च तु युगेषु अभ्यर्च्य इत्यर्थः। तथा चोक्तमपराजि

तायां कृतादिषु गदितं इत्यपक्रम्य ब्रह्मपितामहश्चैव विरंचिकमलासनः। जनसत्र इ

तिसंप्रोक्ता मूर्तयः परमेष्ठिन इति। अथो विष्णुः शिनरक्तनीलः सुतन्तुः कृष्णः क्रैः क्रमा

॥६६॥

(131)

नामभिः हंसद्योरिति। अर्घ्य इति पूर्वेण संबंधः। सुतनुरित्यनेनाकारविशेषो विज्ञापितः
तथा च श्रीभागवते कृतं त्रेता द्वापरं च कलिरित्येषु केशवः। नानावर्णाभिधाकारो नानैव विधि
नेज्यत इत्यादिनोक्तं ज्ञेयं। अथ वासुदेवकमुख्याः पूज्याश्चतुर्मूर्तयो देवस्यादि युगक्रमादि
ति। आदियुगं कृतयुगं तथा चापराजितस्तुलयां। सोमं वामेन हस्तेन दक्षिणेन रविं वहन्। वह्नि
हृदयमध्ये यो वासुदेवः प्रकीर्तितः। आदियुगे द्विजैः पूज्यः श्वेतवर्णः कृते युगे। संकर्षणो वहस्ते
व लांगलं मुसलं तथा। रक्तवर्णः प्रपूज्येत त्रेतायां तत्र जातिभिः। प्रद्युम्नो द्वापरे पूज्यो वै-
श्यैः शार्ङ्गधनुर्धरः। पीतवर्णः पीतवासाः शिल्पज्ञानप्रपकः। कलौ युगे निरुद्धाख्यः पूज्यते
शूद्रजातिभिः। कृष्णवर्णो विहस्ते वरखड्गचर्मकरद्वये। स्तुतो यो निखिलं विघ्नं पापवृंदं च ना-
शायेदिति। अथ कृते धर्मो मनूक्तः स्मृतः। प्रोक्तो गौतमकेन शंखलिखितः। पाराशरस्तेष्विति अ-
न्येषु त्रेता द्वापर कलिषु। तथा च पाराशरः। कृते तु मानवो धर्मः त्रेतायां गौतमस्य तु। द्वापरे शांखलि-
खितः कलौ पाराशरः स्मृत इति। अथोकर्त्तव्यं मणिहेमपद्मजनितं कार्पासिजं च क्रमात् देवाची
सुपवित्रकं कृतयुगादाविति। पद्मशब्देन पद्मसूत्रं। तथा च कालोत्तरे पवित्रारोपणे। कृते मणिम-
यं कार्यं त्रेतायां हेमसंभवं। पद्मजं द्वापरे शस्तं कार्पासं तु कलौ युगे इति। संश्रयेत्पुष्करं क्षेत्रं
नैमिषकाननं कुरुगतं क्षेत्रं च गंगां तथेति। कुरुदेशस्थं कुरुक्षेत्रं कुरुक्षेत्रं। तथा कृतादौ
एतानि क्षेत्राण्याश्रयेदित्यर्थः। तथा च विष्णुधर्मोत्तरे। पुष्करं तु कृते सेव्यं त्रेतायां नैमिषं त-
था। द्वापरे तु कुरुक्षेत्रं कलौ गंगां समाश्रयेत्। अथ युगभेदेन ज्यानि देशग्रामकुलानि यान

स्मृ०

किं जनं चोक्ते क्रमादिति । पराशरः । त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् । द्वापरे कुलमेकं कर्तारं
तु कलौ युग इति । पापिनि भिक्षां न भोजनेष्वहु रिते हानिः कृतादौ यतेदिति । दुरिते हानिः पापेच्छ
निः । क्रमादिति मध्यप्रदीपिकाभ्यामेनात्रापि योज्यं । तथा च तत्रैव । कृते संभाषणात्पतितत्रेतायां
स्पर्शनेन तु । द्वापरे चान्नमादाय कलौ कर्त्रैव लिप्यत इति । अथ कलिधर्माः । तिष्ये श्रेष्ठतरं स्म
र्तुं हरिहराख्यवाभिधाकीर्तनमिति । तथा च महाभारते । यस्त्वेनमः शिवायेति मंत्रेणानेन
शंकरं । सकृत्कलौ समभ्यर्च्य सर्वपापैः प्रमुच्यते । सदा तं यजते यस्तु श्रद्धया मुनिपुंगव ।
लिंगे वा स्थंडिले वापि कौतुकी विधिपूर्वकं । युगकोटिं विनिर्जित्य रुद्रलोके प्रमोदते । इति त
था च अग्निपुराणे । कलौ कलिमलध्वंसं सर्वपापहरं हरिं । येर्चयंति नरा नित्यं तेपि वंद्या य

॥६७॥

था हरिरिति । तथा व्यासः । ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेर्चयन् । यदाप्नोति त
दाप्नोति तदाप्नोति कलौ संकीर्त्य केशवमिति । स्वर्गार्थी विष्णुधालयां कितनुरग्रामान्नृ
पः कारयेत् इति । तथा विष्णुधर्मोत्तरे । देवतावेश्मकृज्जनिनराणि कलौ युगे । कर्त्तव्यानि म
हीफलैः स्वर्गलोकमभीप्सुभीरिति । अथ कलिवर्ज्यानि । वर्ज्यं गोनरवाजिमेधकरणं म
द्यं विवाहः पुनर्व्यूढायाश्च कलौ कमंडलुधृतिर्ब्रह्मव्रतं नैष्ठिकं । ज्येष्ठांशोद्धरणं वराति
थिस्तुराद्यर्थं पशोर्हिंसनं भ्रातृस्त्रीसुतनियोगतः सुतजनिस्त्वादद्वन्स्याश्रमः । स्तेयान्या
धिकपापिशुद्धिरयसंकोन्वोगुणापेक्षया । यद्वेषकृतशास्त्रविप्रहननं विप्रस्य शाति
त्रकं । विप्राणामपनिष्कृतिर्मरणकं संसर्गदोषो महाप्रस्थानोपगमस्त्रयदानं नाग्नि

॥६७॥

प

नामन्याहृतिहीनतः। उद्वाहो जननुः सपिंडदुहितुर्दत्तौरसान्यस्य स्वीकारोपि सवर्णजाँरिणाय

सोमस्य संविक्रयः। विस्त्रंभवाकुनोपयाचितकयोः सामुद्रिकोपःश्रुतिः स्वभादेश्च सुराग्रह

स्यनुकृतियज्ञे च सौत्रामणौ। हलादीनि कलौ त्यजेदिति। स्ते[illegible]या-याधिकपापिशुद्धिः

सुवर्णस्तेयव्यतिरिक्तमहापातकिप्रायश्चित्तं। अथ संकोचो गुणापेक्षया। श्रोत्रियचांदिगु

णेन प्रायश्चित्तन्यूनताउपत्त नारस्त्र आततायी। सामित्रं नामकर्म। मरणायकृ। मरणांता।

जननीसपिंडो मातृसपिंडः। आदिग्रं बृहत्समुद्रयानु[illegible]स्य पुनसंग्रहादीनि वर्ज्यानि।

तथादित्यपुराणे। दीर्घकालं ब्रह्मचर्यं धारणं च कमंडलोः। गोत्रान्मातुः सपिंडाच्च विवाहो गो

व धस्तथा। नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्विजातिभिः। तथा च ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोव

धं तथा। स्मृत्यंतरे। विधवायां सुतोत्पत्तौ देवरस्य नियोजनं। बालायाः क्षतयोन्याश्च वरेणा

न्यन संहृतिः। कन्यानामसवर्णानां विवाहश्च द्विजन्मभिः। आततायिद्विजाग्र्याणां धर्मयुद्धेन

हिंहननं। द्विजस्य श्चौतुर्नौयाः तुः शोधितस्यापि संग्रहः। वानप्रस्थाश्रमस्यापि प्रवेशो विधिनो

दितः। वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा। प्रायश्चित्तविधानं च विप्राणां मरणांतिकं। संस

र्गदोषस्तेथान्यमहापातकनिष्कृतिः। वरातिथिपितृभ्यश्च पशूपाकरणक्रिया। दत्तौरसेतरे

षां च पुत्रत्वेन परिग्रहः। सवर्णान्यांगनादुष्टैः संसर्गः शोधितैरपि। अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्

स्त्रियः। परोद्देशात्मसंन्यास उच्छिष्टस्यापवर्जनं। प्रतिमाभ्यर्चनार्थाय संकल्पश्च सधर्मकः।

अ स्थिसंचयनादूर्ध्वमंगलस्पर्शनमेव च। शामित्रं चैव विप्राणां सोमविक्रयणं तथा। षड्भक्तान

सत्रदीक्षा च सर्वेषां कमंडलुविधारणं। महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे। सौत्रामण्यामपि सुराग्रहस्य च संग्र

(54)

॥५८॥

ज्ञानेनान्नहरणं हीनकर्मणः । एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः । निवर्तितानि विद्वद्भिर्व्यव
स्थापूर्वकं बुधैः । समयश्चापि साधूनां प्रमाणं वेदवद्भवेदिति । आदित्यपुराणे । ज्ञापथः ज्ञाकुन-
स्य प्रः सामुद्रिकमुपकृतिः । उपयाचितमादेशाः संभवंति कलौ क्वचित् । तस्मात्तन्मात्रलोभे
न कलौ कार्यं न कारयेत् ॥ ॥ अथ मन्वादयः । अथ सितो भिन्नश्चैत्रभाद्रस्थितः शुक्लाश्वयुक्तनप
स्यथासितवसुभाद्रैर्थवाश्रावणे शुक्लेपेनवमी शुचौ नुदशमी शुक्ला तु पुष्ये सितैकादश्यू-
र्जे सितेव्वेजो मर्घ्यकृत् नपस्यात् षाढशुक्लो जगिं । शुक्लं पर्वे तपस्य गोनभसि वादर्शोत्र मन्वा
दयः शास्त्रेमीकथिताः शुभाः पितृयज्ञौ दानादिकेके मतामिति । अश्वसप्तमी । वसुरष्टमी
शुक्लोज्येष्ठः । तपस्यगः । फाल्गुनवर्त्तिदिर्शः । नभसिवा इति योजना । मत्स्यपुराणे । अश्वयुक्शु
क्लनवमी द्वादशी कार्त्तिकस्य तु । चैत्रस्य तु तृतीया या तथा भाद्रपदस्य च । फाल्गुनस्य त्वमावा
स्या पुष्यस्यैकादशी तथा । श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा । आषाढे शुक्लद
शमी तथा माघस्य सप्तमी । कार्त्तिकी फाल्गुनी चैत्री ज्येष्ठी पंचदशी तथा । मन्वंतरादव
स्त्वेता दत्तस्याक्षयकारकाः । पुराणांतरे आश्विनेत्यारभ्य श्रावणस्याप्यमावास्येत्स्कं
तथा च नभस्ये वाष्टमी कृष्णेति । अथ कल्पादयः । स्फः । पृक्ष द्वयगाः क्रमात्प्रतिपदाद्याः
श्चैत्रमास क्रमात् । भूतो माधव गौ नधौ तु मदनौ ज्येष्ठ स्थिते पर्वणी । आहे विंशदमी
शुभाः शुभनराकल्पादयः शुक्लगा इति । अमी त्रिंशत् कल्पादयः श्राद्धे शुभास्फः । शु

॥५८॥

135

कुलागः शुभनर इति योजना। नागरखंडे। अथ कल्यादयो राजन्निसादिरा कल्पादीनुक्ता त्रिंः
शा दमी कल्पा स्तिथयः ४ रमे ष्टिन ॥ आरंभ तिथय स्तेबां शुक्ला पुण्यतमाः स्मृताः नास्य
श्राद्धे कृते पुण्यमा कल्पस्थापि कल्पन इति। वह्नी राधतपस्ययोर् सिते गश्चैत्रे वै हिः
कृष्णगः। दर्शौ थोर्जसहस्य योग तसितामुन्यं कमाराः क्रमात्तु मान्ये कथिता अमामुनि
वरैः कल्पादयः पुण्यदा इति। राधतपस्ययोः वैशाखफाल्गुनयोः। असितोस्तिः कृष्णतृती
या। वैत्रेतु कृष्णगो हिः कृष्णपंचमी दर्शश्च अथ क्रमात्तु ऊर्जसहस्यायोगतसिताः। का
र्त्तिक मार्गशीर्षमाघयः शुक्ला मुन्यं कमाराः सप्तमी नवमी दशमी मन्वे सप्त कल्पादयो मुनि
वरैः पुण्यदाः कथिताः। मत्स्यपुराणे। वैशाखस्य तृतीया या कृष्णा या फाल्गुनस्य च। पंचमी
चैत्रमासस्य तथैवांत्यातिथिः परा। शुक्लात्रयोदशी माघे कार्त्तिकस्य च सप्तमी। नवमी मार्ग
शीर्षस्य सप्तैतान्यास्मराम्यहं। कल्पानामादयो ह्येता दत्तस्याक्षयकारका इति। अथव्य
तीपातः। आद्या विंशति रश्चिया ढ्यय फलानी ऊर्ध्वस्ततो विंशतिः सैकाश्रेष्ठतराऽपराद्दशता
ः सप्तव्यतीपातके। दानादानिति। व्यतीपातके प्रसिद्ध्व्यतीपाते दानादौ आद्याउपफलता विं
शति द्वाविंशतिना ऊर्ध्वश्रयाः। तन्नन्तस्तादनंतराः सैकाविंशतिः श्रेष्ठतराः ततस्तदनंतराः
श्रेष्ठतमाः। ततः सप्तातिश्रेष्ठतमा इत्यर्थः। नरसिंहपुराणे। फलं लक्षगुणं सत्यौ भ्रमणे को
टिकृत्यातेण ततोनंतरं ततकोद्यरस्तु पतिते सप्तनोडिका इति। श्रवणाश्चिरो दैवमुभाश्लेषा
दिमां प्रोभूगे। वारे कस्य भवेद् मा बहुफलः सोऽयो व्यतीपातकः। इति वद्धमनुः। श्रवणा

130

॥६९५

श्विधनिष्ठार्द्रनागदेवत्यमस्तके। पद्ममाविचारेण व्यतीपातः सदुच्यते। मस्तके प्रथमच
रणे। एतं च श्रवणादिभिः प्रत्येकं संबध्यते। केचित्तु मस्तकं मृगशिर इति। व्याचक्षते तद्भि
प्रोक्तो कर्म गेति ३ अथ प्रकीर्णकालः। नास्तं स्याद्व्यतिपातवैधृतिसमाख्यक्रांतिसाम्यं श
वेश्चंद्रस्येति। रवेश्चंद्रस्य च क्रांतिसाम्यं यत् तद्व्यतिपातवैधृतिसमाख्यं। व्यतीपातो
वैधृतिरिति समाख्या नाम यस्य तत्तथा। तच्च नास्तं स्यात्। भृगुः। क्रांतिसाम्यसमयः
समीरितः सूर्यपर्वसदृशो मुनीश्वरैः। तत्र दत्तहुतजप्रपूजनं कोटिकोटिगुणमाह भा
र्गवः। अस्य लक्षणमुपरिष्टाद्वक्ष्यते। अथ तिथित्रयस्पृगाति योवारः सपुण्योव
म इति। विष्णुः। तिथित्रयं स्पृशत्येको वारः स्याद्दिनमहितं तत्पुण्यः सोऽपि दिष्टयारव्य
समयस्तिथ्योः क्षये यो भवेद्धासान्न इति। यदा तिथ्योः क्षये तिथिद्वयावसाने वाराव
सानं स दिनक्षयः यत्र तिथित्रये पि वारानुवृत्तिः सो व्यम इति। अथ तिथिस्त्रिवारस्पृशा
सौ तिथ्यधिरण्यो दिनेति। तिथ्यवृद्धिस्तिथिवृद्धिरितियावत्। विष्णुः। त्रिवारस्पृक्ति-
थिर्यत्र दिनवृद्धं तदुच्यते इति। स्पष्टं। पुण्यस्तिथियोगऋक्षकरणाद्यंतेषु कालो दिन
छिद्राख्य इति। तिथियोगनक्षत्रकरणाद्ये आद्यः अंताश्च तेषु यः कालः स दिनछिद्रा
ख्यः। तथा च भृगुः। तिथ्यर्द्धतिथियोगर्क्षच्छेदी नाडि पर्वणाः। स दृष्टो दिनसंधिस्समाख्यो
प्राह भार्गव इति। तिथ्यर्द्धं करणं। छेदोंतः आद्यंतसमयप्रमाणमाह सकृते स्तिथे र

॥६९५

॥७०॥

सोपपदा तिथिः सामावास्या समा ज्ञेया दानाध्ययनकर्मसु तिथ्यवैधृतिश्च व्यतीपात इत्यादिग्रहणे
प्रोक्तैः । अथ निमित्ततः सद्यपुण्यकालः । नो काले क्षणमात्रश्च पात्रयजलान्नादेश्च दाने दिने इ
ति । अथिनश्च आश्रयादिदाने नो कालेक्षणं पुण्यकालप्रतीक्षा नास्तीत्यर्थः । विष्णुधर्मोत्तरे
न कालनियमो दृष्टो दीयमाने प्रतीश्रये । तदैव दानमस्योक्तं यदा पात्रः समागतः । तथा
कालः सर्वो विनिर्दिष्टः पात्रं सर्वमुदाहृतं । अभयस्य प्रदाने तु नात्र कार्या विचारणा । न हि का
लं प्रतीक्षेत जलं दातुं तृषान्विते । अन्नोदकं सदा देयमित्याह भगवान्मुनिः । तद्वत् सक
लप्रसूतसुरभीदाने इति उभयतोमुखीदानमित्यर्थः । स्कांदे । अर्द्धप्रसूतां गां दद्यात् का
लादि न विचारयेत् । कालः स एव ग्रहणं यदासौ द्विमुखी तु गौरिति । मुमूर्षुस्तु चेत् तत्काले
वितरेद्धनादि सर्वसुतां गां वा स्वर्गहीनामुत इति । मुमूर्षुरासन्नमृत्युस्तत्काले मरणकाले स
सुतां सवत्सां उत अथवा । वाराहपुराणे । व्यतीपातोऽथ संक्रांतिस्तथैव ग्रहणं रवेः । पुण्य
कालास्तदा सर्वे यदा मृत्युरुपस्थितः । तदा गोभूहिरण्यादि दत्तमक्षय्यतामियात् । व्यासः ।
आसन्नमृत्युना देया गौः सवत्सा तु पूर्ववत् । तदभावे तु गौरेव नरकोद्धारणाय वा । अशक्तौ तेन
दरुग्विख्यापय सुकृतं दद्याद्वर्मीतां यतान्तर इति । अशक्तौ तु मरणसमये दानाशक्तौ तु अशक्ते
अनासन्नमृत्युः पुत्रादिरिति यावत् तत्कृतगोदानादिकं विधायानन्तरकृतं प्रमीताय मृता
य दद्यात् । व्यासः । तथाहो दिनशक्तौ तिदातुं वैतरणीं तु गां । अशक्तौ न्योरुकूनदादकां दद्या
त्पुत्रो मृतस्य तु । अज्ञाविनंतजनिर्यदाससमयो दाने श्रियश्चायुषो नित्यवादिति । अनि

॥७०॥

निरुक्तिः। नकारो नित्यक्रमः स इत्यनंतरं योज्यः। आयुषो नित्यत्वादिति तत्र हेतुः। मत्स्यपुरा
णे। पात्रे दानाज्जायते वित्तं वित्तं श्रद्धासमन्वितं। तदेव दानकालः स्यादतो नित्यं हि जीवितमिति।
अथ तिथिविशेषवर्ज्यानि। अथ नो निषिद्धं सितपक्षे पञ्चम्यादौ सिंहगे इति। मार्कंडेयः। लि
ह्यादिष्वेषु कृष्णपक्षे चतुर्थ्यां चंद्रदर्शनं। मिथ्याभिदूषितं कुर्यात् तस्मात्तद्वर्ज्येन्नतं सदेति। स
प्तम्यां तिलतर्पणांजनकलीस्त्रैलं भुजिता मृके निंबप्राशन नीलवस्त्रविधृतास्नानं चधात्री
फलैः। वर्जीस्यादिति। वर्जीस्यादिति। अविधागम्यादय इति जिनिः। तद्योगे अर्केनो भं विष्ण
दाधर्मपर्ययोरिति षष्ठीनिषेधात्। कलीनित्यादौ द्वितीयाद्येया। अविषयलु राणे। सप्तम्यां न
स्पृशेत्तैलं नीलवस्त्रं न धारयेत्। नाचाप्यामलकैः स्नायान्नकुर्यात्कलहं नरः। तथा। निंब
स्य भक्षणं तैलं तिलैस्तर्पणमंजनं। सप्तम्यां नैव कुर्वीत ताम्रपात्रे च भोजनं। अथ पर्वानु
ष्ठेयं।। ।।अथ भूतदर्शरविसंक्रांत्यष्टमीपूर्णिमा। पर्वाख्या इति। विष्णुपुराणे। चतुर्दश्य
ष्टमी चैव अमावास्या च पूर्णिमा। पर्वाण्येतानि राजेंद्र रविसंक्रांतिरेव चेति। गदितोत्रशांतिवि
धये होमस्तिलैरक्षतैर्गायत्र्याभियमेनेति। अत्र पर्वसु नियमेर होमो गदित इति पदयोज
ना मनुः। सावित्रान् शांतिहोमं कुर्यात्पर्वसु नित्यश इति। सावित्रान्सवितृदेवताकान्। अत ए
व गायत्रीमंत्रोत्रा। विष्णुः पर्वस्वेव त्र्यंतिलहोमं कुर्यादिति। कर्तुः शरीरनियममाह। ऋषि
न वपुस्यादिति। विष्णुः। अलंकृतस्तिष्ठेदेवमाचारसेवा स्यादिति। पंचदश्योस्तथोगेः प
श्चाद्धनापीतनिन्यगलिताचारः शुचिरुत्तमानिति। पंचदश्योः पूर्णिमामावास्ययोरग

लितावारः ब्रह्मचर्यवान् शुचिः पवित्रः गुप्तिमान् रक्षावान् । अग्नेः पश्चादग्न्यः न्याधानानं
रैतेमिति यावत् । अधो भूमौ शयीत । कात्यायनः । पौर्णमास्याममावास्यामधः स्वापो वि
धीयते । अनाहिताग्नेरयोवं पश्चादग्नेर्विधीयत इति । अनाहिताग्निरत्र स्यात्तदग्निमान् ।
आपस्तंबः । दिवा आदित्यः सत्वानि गोपायति नक्तं चंद्रमास्तस्मादमावास्यानिशायां सा
ध्वीय स्यादात्मनो गुप्तिमिच्छेत् प्रायत्य ब्रह्मचर्य कालेन वजीयया सहजां रात्रिं सूर्याचंद्रमसौ
वसत इति ॥ ॥ मासस्यादुपदे वापित्र यजने योग्यः सदर्भः क्षतोदर्नेयि इति । योदर्भोदर्नौ
क्षितः स मासं जन्मादौ योग्यः स्यात् । मासमित्यंतसंयोगे द्वितीया । षड्विंशन्मते । मासेन स्या
दमावास्या दर्भो ग्राह्य इति । अथ सदा सकर्मसु शुभो दर्भोनि भस्या हृत इति । योन भसि । आ
हृतः स सदा कर्मसु शुभः तथा चाकं । मासेन भस्यमावास्या तस्यां दर्भोच्चयः स्मृतः । अयातयाम
मास्ते दर्भा विनियोज्याः पुनः पुनरिति । अथ पर्ववर्ज्यानि ऊशेसर्वसुदंतकाष्ठपिशितक्षौ
राणि विरुच्छिदां स्त्रीतैलाध्ययनानीति उसर्गसंजे राविशितं मांसं । वीरुच्छिदां वल्लीछेदं ।
मनु वनुर्दश्यष्टमी दर्शपौर्णमास्यर्कसंक्रमे । एषु स्त्रीतैलमांसानि दंतकाष्ठानि वर्जये
त् । हारीतः तैलं मांसं भगं क्षौरं पर्वकालेषु वर्जयेत् । बौधायनः । पर्वसु नाधीयीतेति । विष्णुः
पर्वसु न त् न मपि स्कंधादिति । अमासु तु तिलापिष्टं परान्नं त्यजेत् । छिद्राण्येव सपिण्डु
गा [illegible] कार्यं विना नोधार्यं वसनं न यंन तु पुनर्भुंजीत रात्रौ न चेति । स्मृतिसमा
पा [illegible] परान्नं न पुनर्भोजनं मैथुने तैलं मांसं तिलापिष्टममावास्यां विवर्जयेत् ।

॥७११॥ त ॥७११॥

॥७२॥

रुग्छेदं सतैलं भजेदिति स्पष्टं। नंदाजन्मदिनाध्वरेषु नियमे श्राद्धे च पाले सजेत्तैल स्त्र्याभि
षदनधावनविधी न्यन्यौ तथा प्रोषिन इति। नंदा तिथिः। अध्वरो यागः। नियमो व्रतं। आमि
ष। मांसं। आ तथा व्यासः। षष्ठ्यष्टमीअमावास्या पक्षद्वयचतुर्दशी। अत्र संनिहितं पा
पं तैले मांसे क्षुरे भगे। संक्रान्त्यां पंचदश्यां च द्वादश्यां श्राद्धवासरे। वस्त्रं निष्पीड्य ते नै
व क्षुरेणापि न हिंस्यते। व्यासः। तैलं न संस्पृशेत् धाम वृक्षादीन्छेदयेन्न च। पक्षादौ च र
वौ षष्ठ्यां रिक्तायां च हरेत्स्त्रियौ॥ वामनपुराणे। नंदासु नाभ्यंगमुपाचरेत् क्षौरं च रिक्ता
सु जयासु मांसं। पूर्णासु योषित्परिवर्जनीया भद्रासु सर्वाणि समारभेत। नाभ्यंगमर्के न
च भूमिपुत्रे क्षौरं च शुक्रे च कुजे च मांसं। बुधे च योषां न समाचरेत शेषेषु सर्वाणि सदैव
कुर्यात्। चित्रासु हस्ते श्रवणे च तैलं क्षौरं विशाखा प्रतिपत्सु वर्ज्यं। मूले मृगे भाद्रपदासु
मांसं योषिन्मघाकृत्तिकसु सोत्तरासु। व्यासः। श्राद्धे यज्ञे च नियमे पत्यौ च प्रोषिते तथा।
व्यतीपाते च संक्रान्त्यां नंदाभूताष्टपर्वसु। तैलाभ्यंगं रतिं मांसं दंतकाष्ठं च वर्जयेत्। तथा अ
ष्टम्यां च चतुर्दश्यां पंचदश्यां च जन्मनि। तैलं मांसं व्यवायं च दंतकाष्ठं च वर्जयेदिति॥ षष्ठ्या
दावपि वर्जिते पलमुखे मांसाशने पंचदशे गेन चतुर्दशीति कथितं दोषाधिकत्वायनः
दिति। षष्ठ्यादौ पलमुखे मांसादौ वर्जितेपि मांसाशने पंचदश्यादि षेध्यो दोषाधि
क्यायेत्यर्थः। तथा च मनुः। मांसाशने पंचदशी तैलाभ्यंगे चतुर्दशी। अष्टमी ग्राम्यध
र्मेषु जलं तमपि पातयेदिति। विहितं पित्र्यादि वर्जनविधौ तिथ्यादि तत्कालव्याप्तिः ग
आदित्यादौ न छत्त्रं तत्कालगं ज्ञेयं। यावत्कालं वर्तते तावत्तद्वर्ज्यमित्यर्थः॥

142

सूर्यऋक्षगते सोमे परान्नं यो हि भक्षयेत् तस्य मासगतं पुण्यं यस्यान्नं तस्य तद्भवेत्। मार्कंडेयः
अमावास्यासु सर्वासु नवं वस्त्रं न धारयेत्। तथा च। अमावास्यां न सेवेत रात्रौ भोजनमैथुने।
पीठीनसिः। नामावास्यां हरितं छिंद्यात्। व्यासः। अमावास्यां वनु छिंद्यात् कुत्रीश्च समिधस्त
था। सर्वत्रावस्थितः सोमो हिंसायां ब्रह्महा भवेत्। पित्रादिकार्यार्थं कुशाग्राह्य एवं कुशाः शाकं
चपुष्पाणि वौगर्थं च तृणादिकं। आहरेद्देवपित्रर्थममावास्यां हि निर्द्विजः। तथैव पूर्वमुक्तं वा
दिति। अथ कालविशेषवर्ज्यानि। अष्टम्यादिषु। नारिकेलकमलालाबुरव्यं पटोलं क्रमान्निष्पा
वांश्च मसूरिकाः परिहरेद्धूतोकं भोजन इति। तथा च स्कंदपुराणे। शिरःकपालमंत्राणि न
खचर्म तिलांस्तथा। एतानि क्रमशो नित्यं अष्टम्यादिषु वर्जयेदिति। वृक्षच्छेदनमांसतैलसु
रतक्षौराणि षष्ठ्यां त्यजेत्। श्राद्धाहे ऽग्नुराध्ययोः हरितिथौ क्षौरक्रियां वर्जयेदिति। राध्या
विशाखा। पूर्णिमेयमघोत्तरात्रयपक्षुधेषू ज्ञेऽद्रुतमिति। पूर्णातिथिः आग्नेयं कृत्तिकाश्च
धो वारः संक्रमेश्राद्धाहे बरपीडनं हरितिथौ पक्षावसाने त्यजेदिति। अंबरपीडनं स्ना
नानंतरं वस्त्रपीडनं क्षौरादिना वस्त्रक्षालनं च। पक्षावसानं पंचदशी। नंदायां कुकरा
जे भेषु न भजेत्तैलमिति। नंदा तिथिः वा षष्ठी। चित्राकरोहस्तः अजभं श्रवणः। विष्णो भे
जयामूलप्रोष्ठपदासु नैव पिशितं सेवेतेति। विष्णे भौमे मृगे जयातिथिः प्रोष्ठपदा भाद्र
पदा। रिक्तास्तु तु पक्षत्यां श्रुरकर्म तैलं हरितच्छेदं त्यजेदिति। रिक्तातिथिः पक्षतिः
प्रतिपत्। हरितं स्नानतृणादि। भूमिजे वैधं गंपित्रिान मिति। भूमिजो मंगलः। रवौतु न

153

कालनिर्णकाराः।अत्र यावत्षष्ठ्यादितिथिस्तावत्कालं तैलादिनिषेधः नतु षष्ठ्यादिसंध्याहो
रात्रे प्रमाणाभावादि गोमूत्रं नतु निशामुखे निशि तु मृत्तोयं तथा गोमयं नैवग्राह्यमदृष्टकर्म
स्विति। निशामुखं प्रदोषः। तथा च यमः। नमृज्जनोदकं वापि न निशायां च गोमयं। न गोमू
त्रं प्रदोषे तु गृह्णीयाद्बुद्धिमान्न इति। अयं चादृष्टकर्मार्थत्वे न निशायां ग्रहणनिषेध इति
कालनिर्णयकाराः॥ महागुर्वस्ये वा चरेन्नाध्याध्ययनं च तर्पणं महादानाभिषेक
क्रियामिति। तथा च स्कांदे॥ स्नानं चैव महादानं स्वाध्यायं पितृतर्पणं प्रथमेब्दे न कुर्वी
त महागुरुनिपातन इति। नो द्वाहः शुभदो गुरौ हरिंगते इति। हरिःसिंहः। तथा च मांडव्य
श्रुतियैधजीतकान्नप्राशनमुखं चान्यदिति। सुप्तेनु विष्णौ चरेन्नोद्वाहः व्रतबंधचौ
लमुखसंस्कारप्रतिष्ठामरवान्प्रुण्यं कर्म गृहप्रवेशानमुखं चान्यदिति। तथा चत्रबि
ष्णौ तरे। सुप्तेविष्णौ निवर्तंते क्रियाः सर्वाः शुभादिकाः। विवाहव्रतबंधादिचूडासंस्का
रदीक्षणं। यतो गृहप्रवेशाश्च प्रतिष्ठादेवभूभुजां। पुण्यानि धार्मिकर्माणि नश्यन्ते सुप्तेज
गन्नाथे इति। अथ क्षौरनिषिद्धकालः॥ नन्दार्कशुभं क्षौरं स्नानं प्रियासु भद्रविनरणास्था
नासनाभ्यंगिनां। तद्वद्भुक्तस्तु भुक्तयोश्चन चरेत्क्षौरं निशासंध्ययोर्विष्ट्यादिष्यकृत्ता
र्कजेषु नवमीतिथ्यां च धी मानिति। अनासनः। आसनरहितः। विधिर्भद्रा। तद्वत्तथा
स्नानादीनां भुक्तस्तु भुक्तयोश्चन चरेत्क्षौरं शुभं नोक्तं तथा निशादौ च क्षौरं नाचरेदित्य
र्थः। तथा च ज्योतिःशास्त्रे॥ नाभ्यक्तभुक्तकरणकालनिरासनानां नस्नानसुप्तगमनोत्सु

(१४४)

कश्रूषितानां। संध्यानिशार्ककुजं सौरिदिने नराणां क्षौरं हितं भवविचार्किनचापिवि-
ष्टामिति। मार्कंडेयः। अष्टमी च तथा षष्ठी नवमी च चतुर्दशी। क्षुरकर्मणि वर्ज्याः स्युः पर्वसं-
धिस्तथैव चेति। कालविशेषवर्जनप्रकरणे नवमीनो कृत्यं शोकेति भावः। अथ श्म-
श्रुनिषिद्धकालः। अथ। तिथ्युक्तमनिशासनाश्रितवनां सापेच फहोक्य तस्मात ग्रामधि-
यास्तु नष्टमनसां श्मश्रुक्रिया न स्मृतेति। नष्टमनागेषफकः तथा च मरीचिः। निरा-
सनस्य सुप्तस्य तिष्ठतश्च तथैव च। सापयंत्रकृतवत्रश्चैव स्नातस्य सविनस्य च। भोजनाप्र-
द्धो बृतस्यापि श्मश्रुकर्म विवर्जयेदिति। अथ मांसवर्जनकालः। प्राग्रुक्ते समये तथा
हरितिथौ मांसं चतुर्थ्यांस्त्यजेत्स्वर्गार्थी तु सदा निशासु प दिनो शक्तिः प्रसुप्ते हरौ। मांसं
चाश्वयुजं दिनत्रयमुत स्यान्मांसवर्ज्यं इति। स्वर्गार्थी प्राग्रुक्ते समये काले विशेषव-
र्ज्यप्रकरणोक्तकाले तथा हरितिथौ द्वादश्यां चतुर्थ्यां निशासु तु सदा रात्रिमात्रे मां-
सं त्यजेत्। यदि नो शक्तिस्तावद्वर्जने शक्तिर्नास्ति तदा प्रसुप्ते हरौ वार्षिकमासेषु उता-
थवा आश्वयुजमासं च कार्त्तिके दिनत्रयं वा मांसवर्ज स्यादिति योजना अयं-
तसंयोगे द्वितीया। तथा च नंदिपुराणे। यदिनामनशार्षं सदा मांसं विवर्जयेत्। वर्जे-
येदयने सुखेक्कृत स्वर्गमतिर्नरः। चतुर्थी चाष्टमी चैव द्वादशी च चतुर्दशी। संक्र-
मं चापि सूर्यस्य विषुवे चापि वार्षिके। मांसात्तु विरतो मर्त्यः स्वर्गं याति दिनत्रयं। अ-
थवाश्वयुजं मांसं वर्जयेन्मांसभक्षणं। तथा। यो नरः कार्त्तिके मासे मांसं तु परिव-

॥७३॥

॥७३॥

र्जयेत्। संवत्सरस्य लभते पुण्यं मांसविवर्जनादिति। अथ स्वापनविहितनिषिद्धकालः। नि-
शामध्यस्थप्रहरद्वयं तु विहितं स्वापे यथा। यामौ नयेत् आम्नायाभ्यसनेन पूर्वचरमौ रा-
त्रेरिति॥ अथ रात्रेः पूर्वचरमौ यामौ आम्नायाभ्यसनेन वेदाध्ययनेन नयेदिति। कामेन तु
निशामध्यस्थप्रहरद्वयं तु स्वापे निद्राविषये विहितं। तथा च दक्षः। प्रदोषपश्चिमौ या-
मौ वेदाभ्यासेन तौ नयेत्। यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पत इति। तयोस्तु
न द्विजो न स्वपान्न दिवा न भस्मनि नरोच्छिष्टस्तथा संध्ययोरिति। तयोः रात्रेः प्रथमच-
तुर्थयामयोः। तथा च व्यासः। न दिवा प्रस्वपेत् जातु न पूर्वापररात्रयोरिति। तथांगि-
राः। नोच्छिष्टो न दिवा स्वप्यात् संध्ययोर्न च भस्मनि इति। ब्रह्माधीत्य च नो निशांतसमये स्व-
प्यादिति। ब्रह्म वेदः। तथा च मनुः। न निशांते परिश्रांतो ब्रह्माधीत्य पुनः स्वपेदिति। परिश्रां-
तोऽपि न स्वपेदित्यर्थः। अथोजायया मिश्रीभूय तया समं न तु पुमान् रात्रिं त्रयीनाखिलामि-
ति। मिश्रीभूय। मिथुनीभूय। आपस्तंबः। मिथुनीभूय न सर्वां रात्रिं शयीतेति। अथ दं-
तधावननिषिद्धकालः। आशौचे के दिने तथादिमतिथौ षष्ठ्यां नवम्यो स्वपजे काष्ठैर्दंत-
मृजां व्रतोपवसनो दाहे पुरोगे पु च। मध्या क्षौल्लवने इति। दंतमृजां दंतधावनं। आप्लव-
नं स्नानं। तथा च संवर्तः। अयेतिथौ नवम्यां च क्षये चंद्रमसस्तथा। आदित्यवारश्राद्धे
चे वर्जयेद्दंतधावनमिति। तथा कात्यायनः। प्रतिपद्दर्शषष्ठ्यां तु नवम्यां तु विशेषतः।
दंतानां काष्ठसंयोगे दहत्यासप्तमं कुलमिति। व्यासः। आद्ये जन्मपदिने चैव विवाहे=

वा

मुखदूषिते। व्रते चैवोपवासे च वर्जयेद्दंतधावनमिति। तथा। यो मोहात्तत्समये भ
क्षयेद्दंतधावनं निराशास्तस्य गच्छंति देवताः पितृभिः सहेति। अथ निषेधो मध्याह्नस्ना
नविषयः। प्रातःस्नाने विधानात् शुध्यर्थं प्रातरुत्थाय भक्षयेद्दंतधावनमिति। अत्रा
पि कालविशेषवर्ज्यप्रकरणोक्तो विशेषो ज्ञेयः। अथ निषिद्धसमये ऽलाभे च वा कोष्णितै
र्गंडूषैर्दंत्रानो स्पृजां स रसनोल्लेखां दत्वे ग चरेदिति। अथ निषिद्धसमये। अथ वा काष्ठा
नामलाभे अकोष्णितैर्गंडूषैः द्वादशभिर्गंडूषैः दलैः पत्रैर्वा सरसानोल्लेखां जिह्वोल्ले
खसहितां दंतमृजामाचरेत्। तथा च व्यासः। अलाभे दंतकाष्ठानां निषिद्धायां तथा तिथौ॥

॥३४॥

अपां द्वादशगंडूषैः पत्रैर्वा शोधयेन्मुखं। तथा। प्रतिपद्दर्शषष्ठीषु नवम्यां दंतधावनं। पत्रैर
न्यत्र काष्ठैस्तु जिह्वोल्लेखं तथैव हीति दंतधावनविधिमाह॥ धौम्यः पूर्वेण भिन्नमनेन मनुना
संमंत्र्य तेनाचरेत्काष्ठेनोपसिद्धं दंतधावनमदः प्रक्षाल्य जह्यादिति। उपसि। उषःकाले अ
दः दंतकाष्ठं चौत्वा प्रक्षाल्य आयुर्बलमित्यनेन मनुना मंत्रेण संमंत्र्य तेन काष्ठेन दंतधावन
माचरेत्। ततः दंतधावनानंतरं पुनः प्रक्षाल्य जह्यात्। तथा च कात्यायनः। उत्थाय नेत्रे प्र
क्षाल्य शुचिर्भूत्वा समाहितः। परिजप्य च मंत्रेण भक्षयेद्दंतधावनं। आहे यज्ञेश्च नियमा
न्नोषाप्रोषितभर्तृका। तथा मंत्रः॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च। ब्रह्म प्रज्ञां च मे
धां च त्वं नो धेहि वनस्पते इति। पारस्करः। प्रजाल्य भक्षयेत्पूर्वं प्राजाप्यैव तु तत्यजेदिति।
अथ संध्याकालः। प्रातःसंध्योपासनास्य पतितो कालो प्रत्युषधिः॥ अत्रौ च भयरोगेषु विना

(157)

रामानसीस्मृता॥ सा चोङ्कारयेति॥ प्राक्संध्योपासना सूर्यालोकान्ता· सूर्यदर्शनान्ता स्मृता॥ प्रसक्तपश्चि
मासंध्योपासना उद्घविनक्षत्रदर्शनान्तेत्यर्थः॥ तारः प्रणवः॥ सोङ्कारा यस्या सोङ्कारः अक्षरो यस्यां सा सोङ्का
राप्यि॥ तथा च याज्ञवल्क्यः॥ जपन्नासीत सावित्रीं प्रत्यगातारकोदयात्॥ संध्यां प्राक्प्रातरेवं हि वि
ष्टेदासूर्यदर्शनादिति॥ तथा च विष्णुपुराणे॥ सर्वकालमुपस्थानं संध्यायोः पार्थिवेष्यते॥ अन्य
त्र सूतकादौ च विभ्रमातुरभीतितदिति निषेधे प्राप्ते। सूतके मृतके चैव संध्याकर्म न संत्यजेत्।
मनसोच्चारयेन्मंत्रान्प्राणायाममृते द्विज इति वचनात्सूतकादौ मानसी संध्या कार्येत्याशयेनोक्तं॥
त्यो८ आशौचेत्यादिना। सूतके तु सावित्र्याऽञ्जलिं प्रक्षिप्य प्रदक्षिणां कृत्वा सूर्यं ध्यायन्नमस्कु
र्वीतेति पैठीनसिवचनमपि प्रोक्तं सोङ्कारयेति। अर्घ्यांजलिप्रक्षेपः उच्चारो मंत्रः। आशौचादि
ष्वपि लक्ष्य अंजलिप्रक्षेपणं सोङ्कारं समंत्रकं अन्यत्सर्वं मानसमित्यर्थः॥ अथ संध्यावर्ज्यानि॥
अथ मूत्रादिदानाहारप्रतिग्रहान्निद्रायाः स्नानपाठौ संध्याकाले विवर्जयेत्। तथाप्युक्तं संध्या
यां न स्वपेच्चैव न च विद्यां समभ्यसेत्· न भुंजीत न च स्नायात्क्षुरकार्यादि न च क्षिपेत्॥ दानं
प्रतिग्रहं चैव स्वाध्यायं परिवर्जयेत्॥ दानावैतरकं यातिग्रहीता धोनिमज्जति॥ अथ
रात्रिकरणीयवर्ज्यानि॥ रात्रौ स्नानादिकं नैव कुर्यान्नैमित्तिकं विनेति॥ तथा च भविष्य
पुराणे॥ रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः॥ नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रि
थ ष्विति॥ अथ ऋतुष्यसेवा॥ संध्यानित्री थमध्याह्ने न सेवेत चतुष्पथमिति॥ मनुः॥ म
ध्यंदिने र्धरात्रे च श्राद्धं भुक्त्वा तु सामिषं। संध्ययोरुभयोश्चैव न सेवेत चतुष्पथमिति॥
अथ कालविशेषावलोकनीमानवलोकनीयानि॥ प्रातः पश्येद्धृतं जिर्यंगामग्निं चंदनहे

मनी ॥ मज्जिद्दर्पणं गुर्वाज्यमृदंगे नाकु पार्थिवान् । यज्ञान्नदाग्निचित्सिद्धव्रद्धार्मिक सागरा

न् ॥ कपिलां सवित्रिणामिति । दिनः सूर्यः अंबु उदकं ॥ तथा कात्यायनः ॥ श्रोत्रियं सुभगां गां च अ

ग्निमग्निचितं तथा ॥ प्रातरुत्थाय यः पश्येदापद्भ्यः स विमुच्यते इति तथा ॥ रोचनां चंदनं हेम मृदंगं

दर्पणं मणिं ॥ गुरुमग्निं च सूर्यं च प्रातः पश्येत्समाहितः ॥ लोकेस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हु

ताशनः ॥ हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥ एतानि सततं पश्येन्नमस्येच्च समाहितः

मङ्गमिष्टान्नदं सत्रिणं तानु धार्मिकान्नकुरून् । ज्ञानसिद्धान् सपःसिद्धान् दृष्ट्वा पापात्प्रमुच्यते

अग्निश्चि कपिला सत्री राजा भिक्षुर्महोदधिः । दृष्टमात्राः पुनंत्येते तस्मात्पश्येच्च नित्यशः इति ॥

अथ नद्यादि भगपावित्रनिः ॥ पमत्रेनासीदि हीनादीनापापान्नयेदिति ॥ तथा च सद्वापापि छंदग

गं मत्र्तंन न मुकूं स्नानासिकं ॥ प्रातरुत्थाय यः पश्येत्सकलेरुपलक्षणमिति ॥ अथ नदी रजः ॥१७५॥

॥१७५॥ कालः ॥ अथ निम्नगाः कर्कसिंहगते सूर्ये सिंधुगान्यारजस्वलेति ॥ सिंधुः ॥ समुद्रः ॥ तथा

वा त्रिः ॥ सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ॥ न स्नानादीनि कर्माणि तासु कु

र्वीत मानवः ॥ कात्यायनः ॥ मासद्वयं श्रावणादौ सर्वा नद्यो रजस्वलाः ॥ तासु स्नानं

न कुर्वीत वर्जयित्वा समुद्रगा इति ॥ ग्रीष्मे च क्षापगानां स्याद्भूमौ न लोदकस्य च

श्री दशरात्रं त्रिरात्रं च त्रिरात्र्याः शुद्धिरिति ॥ ग्रीष्मे च न दीनां दशरात्रित्रिरात्रिभ्यां शुद्धिः

स्यात् । तथा च कात्यायनः ॥ याः शोषमुपगच्छंति ग्रीष्मे कुसरितो भुवि ॥ तासु प्रावृषि न स्नानं द

शाहं वा वासर इति ॥ तथा च योगियाज्ञवल्क्यः ॥ प्रथमं कर्कटे देवा त्र्यहं गंगा रजस्वला ॥

१४९

सर्वा रक्ताः महानद्यः करतोयाम्बुवाहिनीति ॥ भूमौ नूत्नोदकस्य चेति त्वकारेण दशरात्रमे
वसमश्नीयतेन त्रिरात्रं ॥ तथा च स्मृत्यंतरे ॥ अजा गावो महिष्यश्च ब्राह्मण्यश्च प्रसूतिकाः
दशरात्रेण शुध्यंति भूमिस्थं च नवोदकमिति ॥ कर्कटे वहस्त्रये । गंगा रेवा चंद्रभागा गोम
ती शारयूः तथा ॥ गंगा जाह्नवी ॥ तथा रजस्वलेत्यर्थः ॥ तथा याज्ञवल्क्यः ॥ प्रथमं कर्कटे देवी
त्र्यहं गंगा रजस्वला ॥ सर्वा रक्ता महानद्यः करतोयाम्बुवाहिनी ॥ करतोया रेवा ॥ कात्यायनः ॥
कर्कटादौ रजोदुष्टा गोमती वासरत्रयं ॥ चंद्रभागा सती सिंधुः शरयूर्नर्मदा तथेति ॥ उपा
कर्मग्रहोत्सर्गप्रेतस्नाने ब्रदुष्टतेति ॥ ग्रहश्चंद्रसूर्योपरागः ॥ अदुष्टता रजोदोषाभावः ॥ तथा
चोक्तं ॥ उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ॥ चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यत इति
प्रस्तृंगादन्यदाहकूपस्थानमपि सोमार्कग्रहे गंगासमं जलमिति । तथा कात्यायनः ॥ स्वच्छ
न्यंभः समानि स्युः सर्वाण्यंभांसि भूतले कूपस्थान्यपि सोमार्कग्रहजे नात्र संशय इति ॥ स्वः
र्धुनी गंगा ॥ अथ सागराश्वत्थस्य कालः ॥ अश्वत्थसागरौ सेव्यौ मंदे पर्वणीति ॥ तथा चो
क्तं ॥ अश्वत्थसागरौ सेव्यौ न स्प्रष्टव्यौ कदाचन ॥ अश्वत्थं मंदवारे तु सागरं पर्वणि स्पृशे
दिति ॥ अथ स्नानकालः ॥ अथ श्रुतिः ॥ प्रातर्मध्याह्नयोः स्नायाद्वानप्रस्थगृहस्थयोः ॥
तपस्विनां त्रिसंध्यासु सकृत्तु ब्रह्मचारिण इति ॥ अस्मृतिः स्नानं ॥ न पश्चिनोय
तमः ॥ तथा च दक्षः ॥ प्रातर्मध्याह्नयोः स्नायाद्वानप्रस्थगृहस्थयोः ॥ यतेस्त्रिषवणं
प्रोक्तं सकृत्तु ब्रह्मचारिण इति ॥ द्वाभ्यां मध्यमः स्नानं सर्वेहि ति त्रयो दश्री ॥ कण्वः

॥७६॥

नवमी दशमी चैव तृतीया च त्रयोदशी। प्रतिपत्तु विशेषेण स्नाने तास्तु विवर्जयेत्। व्यासः।
द्वादश्यां कृष्णपक्षे तु न स्नातव्यं कथंचन॥ शुभसंतानमिच्छद्भिरपवर्गपरैरपि॥ यमः। द्
वे स्नानं न कुर्वीत मातापित्रोश्च जीवतोः। पुत्रः कुर्वन्निरावष्टे मातापित्रोश्च जीवितं।
गगजीवाली॥ त्रयोदश्यां तृतीयायां दशम्यां चैव सर्वदा॥ शूद्रविट्क्षत्रियाः स्नानं नाच
रेयुः कदाचन॥ मनुः। न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि॥ न वासोभिः सहाजस्रं
नाविज्ञाते जलाशये इत्यादि निषेधस्य व्यवस्थामाह॥ दशम्यादौ निषेधोयं नित्यनैमित्ति
के विना। भुक्त्वा निशि सरोगस्य सवस्त्रस्य जलाशये॥ अज्ञाते प्रतिषेधोयं यदृच्छास्नानहेतुक-
इत्यर्थः॥ तथा च स्मृत्यंतरे॥ भोगार्थं क्रियते चेत्तु स्नानं यादृच्छिकं नरैः। तन्निषिद्धं दशम्यादौ
नित्यनैमित्तिकं न हि इति॥ तथा च कालनिर्णयकारैर्न स्नानमाचरेद्भुक्त्वेति वाक्यमुक्त्वा व्या
कृतं॥ भुक्त्वेति न नित्यस्नानः प्रतिनिषेधः भोजनानंतरं प्राप्यमानान्नापि चांडालस्पर्शनिमि
त्तस्य॥ नाशुचिः क्षणमपि तिष्ठेदिति वचनविरोधात् तस्माद्यादृच्छिकोयं निषेधः॥ आतुर
स्य तु अजस्रमनवरतं स्नाननिषेध इति॥ न स्नायादुत्सवे तीते मांगल्यं विनिवर्त्य च॥ अनु
व्रज्य सुहृद्बंधूनर्चयित्वेष्टदेवतां। स्पष्टं॥ अथोष्णोदकस्नानकालः॥ नित्यमुष्णोदकैः स्ना
नं काम्यनैमित्तिकाद्वरति॥ तथा च षड्त्रिंशन्मते॥ आपः स्वभावतो मेध्याः किं पुनर्वह्नि
संस्कृता। तेन संतः प्रशंसंति स्नानमुष्णेन वारिणा॥ वृथा तूष्णोदकस्नानं वृथा जाप्यम
वैदिकम्। इत्यादि निषेधस्तु नैमित्तिकाम्य—

॥७६॥

निषवः॥ तथा च गर्गः॥ कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च॥ नित्यं याद्दच्छिकं चैव य
थारुचि समाचरेदिति॥ अथामलकस्नानकालः॥ सप्तमीनवमीषष्ठीभूतामासंक्रमग्र
हान्॥ भानुवारं विना स्नायादामलैर्द्विजोत्तम॥ आमलैः॥ आमलकैः॥ तथा व्यासः॥ श्री
कामः सर्वदा स्नानं कुर्यादामलकैर्नरः॥ सप्तमीनवमीं चैव पर्वकालं विवर्जयेत्॥ वृद्ध
शातातपे॥ सप्तम्यां चैव नवम्यां च संक्रांतौ रविवासरे॥ चंद्रसूर्योपरागे च स्नानमामलकै
स्त्यजेत्॥ क्रतुः॥ षष्ठी च सप्तमी चैव नवमी च त्रयोदशी॥ संक्रांतौ रविवारे च स्नानमाम
लकैस्त्यजेदिति॥ हारीतोऽपि॥ धर्मेकादश्यां रवावपीति॥ वृद्धशातातपे॥ तुष्टस्त्वामलकैर्वि
द्धरेकादश्यां विशेषत इति॥ यदेकादश्यां रविवारस्तदापि स्नायादेव॥ निषेधस्य
रागप्राप्तस्नानविषयत्वोदित्याशयेनोक्तं रवावपीति॥ अथ तिलस्नानकालः॥ ति
लस्नानं विना स्मृतिं ग्रहामा भानुसंक्रमात् इति॥ स्मृतिर्जन्मदिनं॥ तथा वृद्धशातातपे
तथा सप्तम्यमावास्या संक्रांतिगृहस्मृतिषु॥ धनपुत्रकलत्रार्थी तिलपिष्टं न संस्पृशे
दिति॥ अथ निषेधो नोत्तरायणे॥ तथा च शिवरहस्ये॥ पुरा मकरसंक्रांतौ शंकरो गौ
स्तवे कृते॥ तिलानुत्पादयामास तृप्तये सर्वदेहिनां॥ तस्मात्तस्यां तिलैः स्नानं कार्यं चोद्वर्तनं बुधैः
रित्यादि स्नानविधानात्॥ अथाभ्यंगकालः॥ मंदे सोमे बुधे भ्यंगो भूतपर्वाष्टमीं विना॥ नवमीं चे
ति॥ तथा च ज्योतिःपाराशरः॥ संतापः कांतिरल्पायुः धनं निर्धनता तथा॥ अनारोग्यं सर्वकामा अभ्यं
गाभास्करादिषु इति॥ बौधायनः॥ अष्टम्यां च चतुर्दश्यां नवम्यां च विशेषतः॥ शिरोभ्यंगं वर्जयेत्तु प

152

वंस्त्वपि तथैव चेति ॥ अथ तैलाभ्यंगः ॥ अथ पातादि विनायकं द्वितीयया ॥ सद्वारे भ्यजने तैलमिति ॥
पातो व्यतीपातः ॥ आदित्राब्दो वैधृति संक्रांत्यादीनां ग्रहणं द्वितीयया ऋक्षे सद्वारे अभ्यंगे अभ्यंजने तै
लं शाहं पक्षादौ चरयोः षट्त्यादिनाऽन्यतिथीनां निषेध्यो इयः ॥ तैलं चात्र तिलोद्भवमेवं न कुसु
माम्बुजवं । तस्य विकार इति पाणिनिस्मरणात् ॥ श्रु भद्रव्यकृतं च तद्विति ॥ द्वितीयान्यतिथौ गौण
मिति ॥ तद्वैलं ॥ तथा च प्रचेताः ॥ सार्षपं गंधतैलं च पुष्पतैलं पुष्पवासितं । अन्यद्रव्यकृतं तैलं न दुष्
तिकदाचन ॥ अथ तिलतर्पणकालः ॥ अथ जन्मदिने निषिद्धं ॥ गृहसंध्याभानुवारे न भौमे तित तर्पण
मिति ॥ क्वचित्तु गृहीपाठः ॥ पक्षयोरुभयो राजन्मसप्तम्यां निषिद्धं संध्ययोः ॥ विद्यापुत्रकलत्रार्थी तै
लान्यं च सु वर्जयेदिति ॥ अथ मैथुनकालः ॥ आर्यानिदिछयायाया त्यक्त्वा रात्रिचतुष्टयं ॥ प्रथ
मं नैऋतं पौष्णं मघां संध्यां दिवा निशां ॥ श्राद्धाहादिमतिथ्योश्च पर्वपातग्रहादिवान् ॥ दत्राम्यादि
त्रयं जन्मदिनरात्रित्रयोदशी ॥ एकादशी श्राद्धे भुक्त्वा दानं दत्त्वा भवेद्यमीति ॥ प्रथमं रात्रिचतुष्टयं
अनुदिनमारभ्येत्यर्थः ॥ दिवानिशां ॥ श्राद्धाहादिमतिथ्योर्निशां ॥ श्राद्धतिथिनिशां ॥ श्राद्धाहादिम
तिथिनिशांच । एकादशी अनुदिनमारभ्येत्यर्थः ॥ प्रथमप्रथमरात्रिचतुष्टयादित्यक्त्वा तदिछया
भार्यैछया अनंतावन्न तावपि आर्यायायात् ॥ गच्छेत् श्राद्धं भुक्त्वा दानं दत्त्वा भवेद्यमी श्राद्धे भुक्त्वा दानं द
त्वा च ब्रह्मचारी स्यादित्यर्थः ॥ तथा मनुः ॥ ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ॥ तासामा
द्याश्चतस्रस्तु निंदितैकादशी तथा ॥ त्रयोदशी च शेषास्युः प्रशस्ता दश रात्रयः ॥ विद्वत्ः न श्राद्धभु
क्त्वा न दत्त्वा न संध्ययोः ॥ निवर्तेस्त्वे ॥ दिवा जन्मदिने चैव न कुर्यान्मैथुनं व्रती ॥ श्राद्धं दत्त्वा च भुक्त्वा
च श्रेयोर्थी न च पर्वस्विति । व्रती मैथुनं न कुर्यादित्यन्वयः ॥ सर्वसाधारणं च एकादशीव्रतं तत्र त्रिविधि
नात्मकमित्यभिप्रायेणोक्तं दशम्यादित्रयमिति ॥ पर्वणि पर्वन्निष्टे य प्रस्थावे दर्शितानि ॥ ज्योतिःश

॥२२॥ ॥२२॥ ह

स्त्रे॥ पित्र्यं पौष्णं निऋतिं चैव धिष्ण्यं त्यक्त्वा नारी सुप्रसन्नः प्रसन्नौ॥ पुत्रकामां पुत्रकामो हि गच्छन्
सल्लक्षण्यं पुत्रमाप्नोति सम्यगिति॥ तथा कामी भवेद्वापि स्त्रीणां वरमनुस्मरन् उत्सवे नन्दि
षि हृति थाति रिक्तान्तु काले पि स्त्रीणां मिच्छा नाति कामे दिति विधीयते॥ तथा च गो
तमः ऋतावुपेयात्सर्वत्र वा प्रतिषिद्ध वर्जमिति। पर्वत्यवो ध्याय न वचनं॥ ऋतौ नोपैति यो
भार्यां मन्ते तो यश्च गच्छति॥ तुल्यामायुस्तयो दोषमयो नो यश्च सिंचतीति तदन्तो स्त्रीणा
मिच्छा भावे वेदितव्यं॥ ऋतुकाले तु मेगेनं स्त्रीणामावश्यकं॥ तथा च यमः॥ ऋतुस्ना
ता च या नारी भर्तारं नोपगच्छति। सां ग्राम मध्ये विख्याप्य भ्रूणघ्नां च विवासयेदिति॥ ए
तत्सर्वमभिप्रेत्य ऋतुशब्दो वनभिधाय स्मामान्येनो क्तमाचार्यैः॥ अथ पुंसवनं॥ मा
सि द्वितीये गर्भस्य तृतीये वा यदा पुमान्। नक्षत्रं स्यात्पुंसवनमिति॥ पुमान्नक्षत्रं स्यात्तदेसथः
स त्राशिरश्लकोत्तो॥ हस्तो मूलः श्रवणः पुनर्वसु मृगशिरस्तथा पुष्यः पुंसक्षिते ष्वकार्ये व्रताभि
सुभानि धिष्ण्यानीति॥ अथानवलोभनं॥ चतुर्थे नवलोभनमिति॥ तथा च यमः॥ चतुर्थे गृ
लक्षणमिति॥ अथ सीमन्तोन्नयनं चतुर्थात् षष्ठपर्यन्ते मासि पुन्नोमभे सकृत्॥ सीमन्तो
न्नयनं स्त्रीणां गर्भस्य प्रति गर्भकमिति॥ अयं च संस्कारः स्त्रीणामिसे के तदा सकृदेव कार्यः॥
गर्भसंस्कार इत्यपरे तदा प्रतिगर्भं कार्यः॥ तथा च बैजवापः अथ सीमन्तोन्नयनं॥ मासि चतुर्थे
षष्ठे पंचमे वा॥ सांख्यायन गृह्ये॥ सप्तमे मासि प्रथम गर्भे सीमन्तोन्नयनं॥ ज्योतिषा

पुंसवनं

३

153

स्त्रे॥ सीमंतोन्नयनं कार्यं मासि षष्ठेऽष्टमेऽपि वा॥ पुंनामधर्क्षगते चंद्रे बलिभिश्चावलोकित
इति॥ तथा हारीतः॥ सकृच्च कृतसंस्कारास्सीमंते च द्विजस्त्रियः॥ यं यं गर्भं प्रसूयंते स सर्वः
संस्कृतो भवेदिति॥ तथा विष्णुः। सीमंतोन्नयनं कर्म न स्त्रीसंस्कार इष्यते॥ केचिद्गर्भस्य
संस्कारात्प्रतिगर्भं प्रयुंजत इति॥ अथ जातकर्मके॥ प्राङ्नाभिच्छेदनाज्जातकर्माशौचे तु स
त्यपीति। तथा च मनुः॥ प्राङ्नाभिच्छेदनात्पुंसो जातकर्म विधीयत इति॥ तथा प्रजापतिः॥ आशौ
चे तु समुत्पन्ने पुत्रजन्म यदा भवेत्॥ कर्तुस्तात्कालिकी शुद्धिः॥ पूर्वाशौचेन शुध्यतीति॥
अथ नामकरणकालः॥ नाम चाह्नि द्वादशे नाम मृदुक्षिप्रचरध्रुवैः॥ भैः कर्के वासरे वीरे शुभल
ग्ने शुभान्विते॥ वा वाद्वैनान्येऽपि पक्षाः संगृहीताः॥ तेषां च स्वगृह्यानुसारेण व्यवस्था॥ तथा
च भविष्यपुराणे। नामधेयं दशम्यां तु केचिदिच्छंति पार्थिव। द्वादश्यामपरे रात्रौ मासे पूर्णे त
